
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र M 801 विषय न्यायशास्त्र

नाव. मुक्तावली दिनकरी (टीका) (MSS)

लेखक/लिपिकार —

पृष्ठ 110 काळ — पूर्ण/अपूर्ण

॥ मुक्तावलीदिनकरी ॥

मु०टी०
१

श्रीगणेशाय नमः ॥ गलक्ष्मीपादयुगांभोजं प्रणम्य पितरं श्रीबालकृष्णाभिधं भारद्वाजकुलोद्भवो विधुमिव श्रीगौरवास्यांबुजा
तज्ज्ञात्वा शेषमतं मितेन वचसा सिद्धांतमुक्तावलीगूढार्थास्तनुते पयामृतिमहादेवः परेषां कृते ॥१॥ भाषापरिछे
दव्याख्यानं चिकीर्षुः श्रीविश्वनाथपंचाननो निर्विघ्नपरिसमाप्तिसिद्धये कृतस्य स्वगुरुनिर्देशरूपमंगलस्य शिष्या
अप्येवं कुर्युरिति शिष्यशिक्षायै निबध्नन् कृष्णस्तोत्ररूपं पद्यं प्रार्थयेत्ते चूडामणीकृतेति लीलेति दुर्देवविशेषणं नातः संभा
व्यपुनरात्मवदोष■ वस्तुतस्तु विधोः किंचिच्चूडामणीकरणं किमर्थं वा वासकेलवल्यां किरेणरत्याकांक्षायां
तिराकांक्षाप्रतिपत्तिर्न भवतीति लीलेत्यादिविशेषणानुकूलो विवक्षितान्वयबोधाभावान्नायमन्यदोषः त्व
त्याप्यासः त्वंकांक्षया विशेषणान्वयो विशेषणान्वय एतत्समस्तादिति लीलयात्तांडवं नस्यतत्रपंडितो भिन्नत्वस्य षे
अनेनन्वयस्य विशिष्टतयास्फूर्तिविषयत्वात्प्रापिता अर्थो भवत्येव तिस्रश्चितैनन्चाभूषणैः सहितेकपंचत्वस्य
तत्राह चूडामणीकृतेति अचूडामणिः चूडामणि■वत्संपद्यमानं करोति चूडामणीकरोस्मात्यमणीकृतो
विधुर्येन स तथा तस्य पः॥ वलयीकृतेति॥ अवलयं व■लयं संपद्यमानं करोति वलयीकृतश्च वलयीकृतो वासुकिः

तेत्रत्वावरे
दोष
राम०

सात
टि

येन स तथा तस्य पः॥ शिष्यावधानाय प्रतिज्ञानीते निजनिर्मितेति निजेन■ स्वेन निर्मिता रचिता या कारिकावली तां अति
अतिसंक्षेपः शब्दस्तस्य हेयायास्तत्ता अतिसंक्षिप्तास्ता हरश्च स्वताश्चिरत्तेनानां कणादप्रभृतीनां उक्तपोवचां
सिद्धचः प्रतिपाद्यायुक्तपस्ताभिरिह विशदीकरवाणि■ प्रक■■■दीकरवाणीत्यत्र पाठे करोमीत्यर्थः नतु ली
लावत्यादिप्राचीननिबंधाख्यपद्ये नैव कारिकावलीप्रतिपादितो योऽर्थो बोद्धव्यः किमनेन भवत्कृतविशदीकरणेन व
येनेत्यत उक्तमतिसंक्षिप्तैरिति तथा च लीलावत्यादिप्राचीननिबंधेषु ग्रंथे वाहुल्येन बहुतरदुःखबोधेतुप्रति
पत्तिकृतयान बालानां प्रवृत्तिरिति भावः॥ स्वात्मक्षामलकतामयुक्तो नाहरणीयतो भिन्नसिद्धविरक्तनेस
क्तेनेत्युत्सवधारणेन तथा च कृतकादेव तत्स्वयंपरत्वेन स्वस्य ग्रंथप्रकरणकेशाभावकमचितः स्वस्य ग्रंथकर
णप्रवृत्तो निर्भिन्नमाह राजीवेति राजीवपादयाकृपया तपात्रशंवदस्तदधीनरस्य थः नतु ग्रंथादौ श्रोतृप्र
वृत्तये प्रयोजनादिकं उक्तत्वादपक्षणीयत्तेतद्ग्रंथस्य स्यादिस्याशंक्य विषयप्रयोजनसंबंधाधिकारी वक्तव्यो भवति
तस्य चेहाधिकारिणः सच पन्नेति संक्षिप्तत्वादेतद्ग्रंथस्य सकलपदार्थप्रतिपादकतया कथं बालव्यु

मु॰दि॰
२

सज्जितिरित्याशंकां चेत्तत्तग्रंथस्य सकलपदार्थप्रतिपादकत्वप्रदर्शनेन परिहरन्नयत्नकरोक्षिपदस्यासियग्गुहोपिदें
वासिद्धासियत्पूतपस्यमिकीं तेयत्तत्कुरुष्वमदर्पणामितिभंगावद्गुक्तामुक्तावलीसमंस्वकीयग्रंथस्याभाव
निवायपत्वकीत्पेन हृत्ते पग्रंथस्य स्वस्यचनाममनीषवभातिसद्व्यतिद्रव्येःसहितायुक्ताप्रतिदंतेयागुरोरपि
गुंफितायुक्तामत्तामुक्तेपरणार्दिनापेचानांकमेणांत्ता पिकावोधिकामत्त्तातिरूपसामान्यविशेषाभिन्नपःसम
वायमेभिमिलित्तापूदर्संति सामान्यविशेषनित्यमिलितानियस्यानिमिलिनेनित्यःसंबंधःअभावमकाथमा
पभावादिभेदेनवैलक्षणेत्तस्यैज्वलायकाशिकारणावच्छिन्ना मिद्धांतमुक्तावलीसिद्धांता एवमुक्तामत्ता
सांत्र्यावलीपंक्तिर्विशेषानोरायणस्यवक्षसिवक्षःस्थलेविन्यस्ताविशेषतोर्पितामक्तिनांपंडितानाम्म
नसामुदंसंतोषोविद्धहकेलंवितन्वतांविस्तारयत्विसर्थः।नमयुक्तोनामवामत्वात्वायद्विदुषांसंतोषस्त
चाहस्यमुक्तिरितिसत्योयुक्तयापूर्ससातयामुक्तावलीसाहश्यपचय्येयद्वयोदिपदार्थवत्तंपोपधाहिमु
क्तावलीसद्रव्यासाध्यतयाद्रव्यवतीद्रव्यामाध्यतियावत्नानाविधद्रव्यघटितावोगर्भोनसन्त्रेरागुंफिता

पा॰ क॰ २
५
राम॰
२

५

निर्मितास्तकृतिनांपुरापवत्तोयानिसंतिसमीचीनानिभगवद्भजनादिरूपाणिकर्माणितेषांवोधिकासत्सामान्य
समीचीनाजातिविशेषामहंनिर्मलत्वादिस्तार्थ्यानित्यमनुवर्ततेमिलितासंवद्धाअभावतेजोभावंधकारस्तति
प्रकर्षेणोज्ज्वलाग्रंथप्रकाशिकेतिद्रव्यादिसकलपदार्थवतीत्यापंग्रंथापीतिग्रंथ्त्रचसक्तावलीतामार्गनिर्दे
प्रवृत्तसंश्चितंअत्रद्रव्यादिपदार्थप्रतिपादकत्वप्रदर्शनेनद्रव्याद्योविषयादक्ताःपदार्थतत्वावधारणंप्रयोजन
नंसंचितंसंवंधश्चप्रतिपाद्यप्रतिपादकभावःपदार्थतत्वावधारणाकामोभिक्षिकारीतिग्रंथारंभसमयेकृतस्य
मंगलस्यानिवंधनस्यवृथेयथ्यमाशंक्यफलदर्शयतिविघ्नविघातायेतिप्रारब्धमिघस्यग्रंथस्यतिशेषःय
घपिअत्रतत्पदस्य [illegible] त्यन्तिमदभावपरतया क्षिपदमवयंकमितिप्रतिभातितथापिविशिष्टवा
चकानांपदानांमतियविशेषणवाचकपदसमभिव्याने विशेष्यमात्रपरतायाःसकीयकैमीहृतपूर्णारं
ककीवकपदद्धत्वाद्यात्तपदमभावमात्रपरंद्रष्टव्यंतनुनिष्फलत्वानंगलाचरणमयुक्तेनेव
निष्फलत्वमवासिद्धंतस्यफलेविशेषेअन्यत्वनहेतुनासानादित्यभिप्रायेणाशंकतेनचेतिमारिति

विशेषाभावकूटत्वेनहेतुनासाध्याभावसाधनाते।

५
प
घा॰५
द्रव्यादिनाशे
५

साध्यं

स्य कारणत्वाभावव्यतिरेकव्यभिचाररूपं हेतुमाह विनापीति निर्विघ्नपरिसमाप्तीति विघ्नध्वंसं समाप्तीत्यर्थः न च तत्र ज
न्मान्तरीयमंगलकल्पनान्न व्यभिचार इति वाच्यं भोगादिनापि नाशकाले निर्विघ्ननाशसंभवेन जन्मान्तरीयमं
गलसंदेहेन व्यभिचारसंभवात् तत्र च कादंबर्यादिग्रंथे मंगलसत्वेपि समाप्त्यदर्शनेनान्वयव्यभिचारोपि हेतो
र्बोध्यः व्यभिचारसंदेहग्रस्तसंशयरूपतया कारणताप्रतिबंधकत्वेन तत्वमिति तत्र चेत् स्यादनुकूलत्वादि
त्यभिप्रायवान् मंगलस्य समाप्तिफलकेसमाप्त्यन्यफलेकत्वे सति सफलत्वादिति परिशेषमानेन मंगलस्य
समाप्तिफलकत्वं व्यवस्थापयिष्यन् प्रथमतो विशेष्यासिद्धिनिरासाय फलवत्त्वं साधयति अविगीते
ति विषयत्वे ज्ञानविधेर्वा हितात्ति विषयत्वस्य च विधेयत्तयाबाधितेन फलेन व्यभिचारस्तस्याहृप्तत्वात् इति वि
षयत्वात् विधेयत्वात् इति विषयेत्वं चेत्पुंदनादावुपस्पतः शिष्टेति शिष्टकृतेन शिष्टत्वे च फलसाधनता शि
ष्टाति[illegible]हितत्वेन तु वेदप्रामाण्याभ्युपगंतृत्वेन तत्वज्ञमरणकृते दर्शदोनिष्फलेन व्यभिचारः शिष्टाचारवि
षयत्वे शपनयागादावप्यस्तीति अविगीतेति अविगीतत्वं च बलवदनिष्टाननुबंधित्वं तेन श्येनयागादौ न हस्तु
क्तवलवदनिष्टाननुबंधीष्टसाधनत्वरूपसाध्याभावेपि न व्यभिचारः असिद्धम्प्रत मितितत्र मंगलं सफलं शिष्टा

सायां विशेषतः फलजिज्ञासायामनन्तरकृत्यं तर्हि गंगास्नानादिनामहत्पुण्यैकमेव तत्तः संभवतीति तथा च तत्र हेत्वासं
भवेनादृष्टकल्पनेति भावः न च तथापि विघ्ननिवृत्त्यायात्व एव कल्पतामत आह उपस्थितत्वादिति आरब्धं
कर्म निर्विघ्नं समाप्यतामिति ग्रंथमहन्तपुरुषकामनाविषयत्वेन परिशेषानुमानप्रवर्त्तमानस्योपस्थितत्वादि
त्यर्थः कल्प्यतत्वमनुमीयते अनेन च मंगलस्य समाप्तिहेतुत्वे अनुमानमेव प्रमाणं न तु शिष्टाचारानुमिता
श्रुतिरिदानीमानत्ववीविशेषनिर्णयाभावेन तस्या अबोधकत्वादिति सूचितं व्यापकत्वघटितकारणता
ग्रहप्रतिबंधकत्वानेव व्यतिरेकव्यभिचारसहचरितत्वं चेतिमंगलस्य समाप्तिफलकत्वे
तत्र च आपि नास्तिकादिग्रंथे पि तत्संगसंकल्पनेनानुमीयते कार्यरूपसमाप्तिरिशेषात्तस्य संदेह
पर्यवसन्नस्य पूर्वोक्तव्यभिचारसंशयस्य कारणतानुमितावप्रतिबंधकत्वाद्व्यभिचारनिर्णयस्य चा
भावादिति भावः नन्वेवमप्यन्वयव्यभिचारस्तान कारणतायां हृदि विरोधिभविष्यति सेत्पाशंक्याव्यभिव
भिचारं निरस्यति यत्र चेति तत्र कादंबर्यादौ वैगुण्यं वैजात्यं न त्वेवमपि कादंबर्यादौ कृतो न विघ्नध्वं

मंगलें ५ समाप्तिः ४

९ तथा च मंगलस्य विघ्नसमसंख्याकमंगलत्वेन नाश्यत्वात् तावत्तत्र विघ्ननाशादिति भावः। अत्र च विघ्नसमसंख्या
सहस्पत आह प्रचुरस्येति प्रचुरस्यैव मंगलस्य तत्पर्यं भूलवत्तरविघ्ननिवारणे बलवत्तरादिविघ्ननिवारणे तेन प्रचुरवि
घ्नमस्याप्यसंग्रहः। नन्वेतथापि कादंबर्यादौ विघ्नध्वंसाभावात् समाप्तिः परं जायतां मलरूपहेतोः सत्वादित्यत
आह विघ्नध्वंसस्यैव संबंधेन मंगलाभावान्न समाप्तिरिति भावः। आहुरित्यस्वरसोद्भावनेन तद्बीजं तु विघ्नध्वंसद्वारा मंग
लस्य हेतुत्वेन संभवति। नास्तिकग्रंथसमाप्तौ व्यभिचारात्। न च स्वजन्यविघ्नध्वंसो तत्त्वावच्छेदकतासंबंधेन समा
प्तिं प्रति स्वजन्यविघ्नध्वंसाच्छेदकतासंबंधेन मंगलस्य हेतुत्वात् स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्वसं
बंधेन समाप्तिं प्रति आश्रयतासंबंधेन समंगलस्य हेतुत्वात् जन्मांतरीयमंगलकल्पनया न व्यभिचार इति वाच्यं
तथा सति जन्मांतरीयसमाप्तिमुद्दिश्य जन्मांतरीयमंगलकरणापत्तेः। तः स्वप्रतियोगिचरमवर्णावच्छेदकता
संबंधेन समाप्तिं प्रति स्वात्यत्वावच्छेदकजातीयतासंबंधेन मंगलहेतुत्वस्य वाच्यत्वतया नास्तिकशरीरव्यभि
चारस्य दुर्वारत्वात्। न च पुत्रकामाधिकरणाविरोधः तस्य कार्यत्वे सम्भवधानेन [illegible] ऐहिकपुत्राभावेप्या
मुष्मिकपुत्ररूपफलस्य तत्र सिद्धत्वादिति वाच्यं तत्र पुत्रमात्रकामना श्रवणादिहं तु विशिष्टाचारा

शिष्ट

५ सर्वथा इतोऽसंगच्छेत अभ्युपगमात् तत्रापि काशीमरणादिति मुक्तिं प्रति काशीमरणहेतुत्वस्य निर्दुष्टतया तत्पापवर्णनस्य
फल
नुमितश्रुत्या ऐहिकसमाप्तेरेव मंगलत्वात् न च स्वावच्छेदकावच्छिन्नप्रतियोगिकत्वस्याव्यवहितोत्तरक्षणोत्पत्तिक
त्वोभयसंबंधेन मंगलजन्यविघ्नध्वंसविशिष्टसमाप्तित्वस्य मंगलकार्यतावच्छेदकत्वान्न व्यभिचार इति वाच्यं कारण
स्य कार्यतावच्छेद[illegible]कत्वानुपपत्तेः। अत एव काशीमरणान्मुक्तिरिति श्रुत्यंतर्गतं यच्च तस्याः प्रयोजकत्वप
रत्वोपवर्णनं मसंगतमेव स्यात् अथ तमेव विदित्वाऽतिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति श्रुत्या तत्त्वज्ञान
स्य मुक्तिसामान्यं प्रति हेतुत्वप्रतिपादितं तत्त्वं काशीमरणस्य मुक्तिहेतुत्वेन संभवति। काशीमरणजन्यमुक्तौ
तत्त्वज्ञानस्य व्यभिचारादतः काशीमरणस्य न मुक्तिजनकत्वमपि तु तत्त्वज्ञानद्वारा मुक्तिप्रयोजकत्वमेवे
ति ग्रंथकृतां तात्पर्यं च तस्याः प्रयोजकत्वपरत्वोपवर्णनं न तु कारणस्य कार्यजातावच्छेदकत्वं तत्तो
पवर्णनमिति चेद् हेतुकारणस्य कार्यतावच्छेदकत्वमस्तु च एवं तत्र ईश्वरमंगलजन्यविघ्नध्वंसविशि
ष्टसमाप्तित्वस्य कार्यतावच्छेदकत्वेन नास्तिकशरीरव्यभिचारवारणं एवमपि भोगान्निवारण विघ्न
ध्वंसस्यैव समाप्त्यौ ह्यत्पत्तिनियतपूर्ववर्तित्वाकेन ध्वंसेनैव मंगलीयसमाप्तिपर्यंते मंगलस्यान्य
ल स्व

मु.टी.
५

यासिद्धत्वं दुर्वारमेवं न च व्यापारेण व्यापारिणोऽनन्यथासिद्धिरिति वाच्यं यत्र व्यापारिणः प्रमाणेन बोधितकारणतानिर्वाहा
य व्यापारस्य कारणत्वं कल्प्यते यथा यागस्य स्वर्गहेतुतानिर्वाहायापूर्वं तत्रैव व्यापारिणोऽनन्यथासिद्धिरत्र ए
व काशीमरणस्य तत्त्वज्ञानेन मुक्तावनन्यथासिद्धत्वात् प्रयोजकत्वपरतया श्रुतिसमर्थनं संगच्छते प्रकृते च प्रति
बंधकाभावस्य कार्यमात्रे हेतुतया मंगलकारणतां विनापि क्लृप्तत्वया मंगलस्यान्यथासिद्धत्वं दुष्परिहरमेवे
ति विघ्नध्वंसस्य द्वारत्वमिच्छतां प्राचां मतेपि विघ्नध्वंसस्य कार्यत्वावश्यकतया विघ्नो निवर्त्ततामिति कामनया मं
गलाचरणेन च विघ्नध्वंस एव फलमिति वदतां नवीनमणिकृतां मतम् आह न व्याप्त्येति विघ्नध्वंस एव तत्कारण ५
समाप्तिर्व्यवच्छेदः फलं प्रवृत्तस्येदृशम् ननु समाप्तिस्त्वलौकिकी स्यादित्यत आह समाप्तौ त्विति बुद्धिज्ञानं
प्रतिभा तद्धेतोः स्मृत्याख्याप्रतिभादेरित्यादिना विघ्नसंसर्गाभावपरिग्रहः अनयैव रीत्या कारीर्यादिस्थलेप्येवं ग्रह
निवृत्तिरेव फलं हि स्तुतस्य कारणादेवेतिध्येयम् एवं मंगलस्य विघ्नध्वंसं प्रति प्रजनकत्वे स्वतः सिद्धे विरहेवे ६
त्येति विघ्नात्यंताभाववतानुष्ठाने निष्फले प्रवृत्तिरेव कथमत आह विघ्नशंकयेति संशयनिश्चयसाधारण

एम०
५

विघ्नज्ञानमेव प्रवर्तकमिति भावः तदाचरणान्मंगलाचरणात् ननु विघ्नसंशये मंगलाचरणमेवासिद्धमित्यत आह त
थैवेति शिष्टाचारादिति विषयतासंबंधेन मंगले इति शेषः।। ननु निर्विघ्नपुरुषानुष्ठितमंगले स्यादेवनुपपत्त्या बोध
भिचारेण विघ्नध्वंसं प्रति मंगलस्य कारणता बाधिता तथा च बाधितार्थबोधकत्वाद्वेदस्याप्रामाण्यमिति मीमांसकोक्तेः ६
कारणकोटौ ता बोधकत्वोपगीकर्तृमते शंकां निरस्यति न चेति तस्य निर्विघ्नपुरुषानुष्ठितमंगलस्य तद्बोधके
ति मंगलविघ्नध्वंसयोः कार्यकारणभावबोधकेत्यर्थः स्यादिति विघ्नरहितत्वे तथा च उपदर्शितस्यैव प्रतियोगि
रूपकारणाभावेन विघ्नध्वंसस्य कार्यानुदयोपपत्तौ कारणतायाश्चाबाधितत्वेन न कारणताबोधक वेदाप्रामाण्यमि
ति भावः अत एव नाशस्य प्रतियोगिनः कारणत्वादेव तद्बोधके वेदाप्रामाण्यमिति प्रायश्चित्तस्य पापनाशकं बोध
वेदाप्रामाण्य केत्यपि न तु मंगलेन विघ्नध्वंसे कारणं [illegible] विनायकस्तवपाठादिजन्यविघ्नध्वंसे व्यभिचारात् विनायकस्त
वस्य मंगलत्वेपि तद्ध्वनकत्वकंठाभिघातरूपस्य तत्पाठस्य मंगलत्वाभावात् न च पाठकतासंबंधेन विघ्नाः शमं
यांतीत्यादिना तत्पाठस्यापि विघ्ननाशकत्वबोधनात् प्रायश्चित्तजन्यविघ्नध्वंसे व्यभिचारात् तस्मादाह मंगे

१स्मृतत्वपाठानुकूलत्वसंबंधेन २ २विनायकस्तवस्य विघ्ननाशकः।। सत्यं

मु.टी.
६

ल्पेचेति स्तवपाठादिरित्यादिना प्रायश्चित्तादिसंग्रहः तथाच मंगलस्य स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेन मंगलविशि
ष्टविघ्नध्वंसत्वं विजातीयविघ्नध्वंसत्वं वा कार्यतावच्छेदकं एवं विनायकस्तवपाठादेरुपदर्शितसंबंधेन विनायकस्तव
पाठादिविशिष्टविघ्नध्वंसत्वं विजातीयविघ्नध्वंसत्वं वा कार्यतावच्छेदकमिति न व्यभिचार इति भावः ननु विघ्नध्वंस एव
यदि मंगलस्य फलं तदा समाप्तिकामस्य मंगले प्रवृत्तिर्न स्यात् ततः समाप्तिसाधनविघ्नध्वंससाधनत्वान्मंगले प्रवृत्ति
र्वाच्या तच्च न संभवति स्वतःसिद्धविघ्नविरहस्थले व्यभिचारेण विघ्नध्वंसस्य समाप्तिसाधनत्वाभावादित्या
शंकां निरस्यति क्वचिदिति प्रतिबंधकेति संसर्गाभावस्य संसर्गाभावस्य तथा च विघ्नसंसर्गाभावत्वेन हेतुत्वान्न
पूर्वोक्तव्यभिचार इति भावः अत्र च तत्तद्विघ्नाभावत्वेन हेतुत्वानानुविघ्नाभावकूटत्वेन विघ्नप्रागभावादीनामेकत्रा
संभवेन समाप्तिर्न स्यादिति विभाव्यं यत्र मंगलं विनापि समाप्तिस्तत्र विघ्नं भूयस्त्वात्तत्र मंगलानंतरोत्पन्नविघ्ना
देवध्वंसाभाववृत्ति समाप्त्यदर्शनात् व्यतिरेकव्यभिचारमाशंक्य निषेधति दर्शनेति दुरितध्वंसकल्पनेनेत्यनेन काम
नेमंगलकल्पनेनैव गौरवादाह स्वत इति यत्र च मंगले सत्यपि समाप्तिस्तत्र मंगलाद्विघ्नध्वंसो भवत्येव समाप्त्यं ‹ पंक्त्र

(संसर्गाभाव त्वेन)
पि न स
भावस्तु पि मस्ह

न
ले

धित्वनिश्चयरूपरतिना वांतया पि संदिग्धोपाधित्वस्य दुर्वारत्वात् न च हेतोः पाधिसंदेहाहितो व्यभिचारसंदेहः
पक्षीयव्यभिचारसंदेह एव स च प्रतिबंधक इति वाच्यं पक्षेतरत्वस्यापि व्यभिचारसंशयस्यापि प्रतिबंधकत्वादत्त
एवानुकूलतर्कविरहदशायां पक्षेतरत्वं संदिग्धोपाधिरित्यभिधानं यथास्तां संगच्छते इति तत्र कार्यत्वेन क्षितित्व
न कार्यत्वाप्रामाण्यभावरूपस्यानुकूलतर्कस्य सत्वेन कार्यत्वरूपहेतोः साध्यव्याप्यत्वनिश्चयेन साध्यव्याप्यव्यापक
त्वेनोपाधौ साध्याव्यापकत्वनिश्चयान्नोपाधिरिति एवं चोक्तानुमानेनेश्वरसिद्धौ तदुच्चरितत्वेन वेदस्य प्रामाण्यमनि
ष्पाद्य दोषेपि वेदस्येश्वरप्रमाणमित्याह द्यावाभूमीति इत्यादि य इत्यादिना ईश्वरमुपासीत यः सर्वज्ञः सर्ववित्स्य
ज्ञानमयं तपः सोकामयत इत्यादिनां परिग्रहः कार्यपक्षकानुमाने चोपलक्षणं तस्य गांधे कालीनघ्यरागक
प्रयोजकं कर्मप्रयत्नजन्यकर्मत्वात् गुरुत्ववेगोपतनाभावः पतनप्रतिबंधकप्रयत्नप्रयुक्तः धृतित्वात्
व्रांडनाशः प्रयत्नजन्यः नाशत्वात् घटादिव्यवहाराः स्वतंत्रपुरुषप्रयोज्यः व्यवहारत्वात् आधुनिककं
ल्पितलिप्यादिवत् वेदजन्यप्रमा वक्तृयथार्थवाक्यार्थज्ञानजन्या शाब्दप्रमात्वात् वेदः असमाभ्युक
घप्रणीतः वेदत्वात् वेदः पौरुषेयः वाक्यत्वात् घ्यणुकपरिमाणजनिका संख्या अपेक्षाबुद्धिजन्या

एकत्वान्यसंख्यात्वादित्यनुमानांतराण्यपिसाध्यानि परत्वापरत्वादीश्वरसाधकानि वोध्यानीति तदुक्तं कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्ययः इति निरूपितत्वात् इति शेषः संयोगोपि प्रत्यक्ष यो गुणः नेकर्मणि घटेगम्यते नेनेतिपदं व्यवहारइतिसंसेपः मूलेशिष्यावधानाय प्रतिज्ञानीते द्रव्यंगुणस्तथेति तथा कर्मणोभिरिक्तत्वंनास्तीतिभ्रमवारणंमत्तनिरुक्तंपदार्थेष्वंतर्भावाभावायपदार्थत्वाभावोपिदर्शितः अभावः अधिकरणात्मकएवेति प्राभाकरमतंदूषयितुं पुनस्तस्योक्तिः प्रायेणैवमेतेषांपविभागवाक्यस्यसूत्रे अधिकसंख्याव्यवच्छेदकत्वं यथासत्यन्यूनसंख्यालक्षणानामपिसत्त्वग्रहणात् प्रत्यक्षादिकेनचैवमेव पदार्थाः कुतोनोक्ताइत्यतआह केचिदितिअतिरिक्तानामपिपदार्थानांसत्त्वंवरणादयमिति मिस्त्रज्ञानाभावादिति भावः नन्विति एवमेतेषुषट्सद्भावपदार्थाः सत्त्वसमत्वभावभावइति निरूपितंतत्त्वेनात्रकुतोननिरूपितमित्याशंक्याह मुक्तावल्यां सत्तामत्त्वेति अत्र समवायिकार्थसमवायात्तरसंबंधेनसत्ताद्वत्वेभावत्वंतदभावोऽभावत्वमितिमात्यूम[illegible]ितिनमात्तत्वेंपयगुपन्यासइतिभावत्वेनोपन्यासइत्यर्थः तेषामिति शेषः नन्वन्येपदार्थाः कथंनसंतीत्यायंथेयोडशपदार्थनिरूपणादित्याशंक्यनैयायिकानामपिमतेस एम॰

त्यपदार्थेष्वसविरुद्धेषोडशपदार्थानांसत्यपदार्थेषुअंतर्भूतत्वादित्याह एतेचेति उक्तार्थेभाष्यसंमतिमाह प्रतिपादितचेति एवमेवेति द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सत्पेवपदार्थाः षोडशमास्मैवेवांतर्भावादितिप्रतिपादितमित्यर्थः कथमंतर्भावइतिचेदित्संप्रमाणासेंद्रियादेद्रव्यादौव्याप्तिज्ञानादेर्गुणेप्रमेयस्यात्मशरीरेंद्रियमनरूपस्यद्रव्येर्थस्यगंधरसरूपस्पर्शशब्दस्वरूपस्यगुणेबुद्धेर्गुणेमनसोद्रव्येप्रवृत्तेर्गुणेदोषाणामिच्छाद्वेषमिथ्याज्ञानस्वरूपाणांगुणेद्वेषमोहपदस्य तिपाघानीगुणेप्रत्यक्षत्वाभावोजननमितित्युत्पत्त्या मरणोत्तरजन्मत्वप्रत्यक्षावपदस्यहेतिनिमित्तंचरमप्राणशरीरसंयोगध्वंसामरणआद्यःशरीरप्राणसंयोगोजन्मतथाचमरणोत्तरत्ताहशसंयोगरूपस्यतस्यगुणेस्वरूपःस्वसंवेदनरूपस्यमुख्यफलस्यगुणेगौणस्यसाधारणाजन्यमात्रस्वरूपफलस्यापिद्रव्यादिषुणीगत्वस्यशास्पदुःखस्यगुणेअंतर्भावःअपवर्गस्यात्यंतिकीदुःखनिवृत्तिःदुःखानिशरीरषडिंद्रियाणिषड्विषयाःषड्बुद्धयःसुखंदुःखंचेत्येकविंशतिःतत्रदुःखत्वरूपात्यंतिकशरीरादेदुःखसंबंधित्वयागौणंदुःखत्वंमुख्यगौणदिसर्वसाधारणदुःखत्वरूपेणतन्नाशदृष्टाने नदुःखसंबंधित्वमप्याहतेमयानेवैकविंशतिदुःखांतप्रगतयोनित्यत्वात्कपेतन्नाशइतिवाच्यपर्द्धपाव

मनःगोवणायो

मु.वी.
१२

शिष्टस्य श्रवणस्य ज्ञानद्वारा दुःखहेतुत्वात् दुःखत्वं तद्रूपस्य कर्णशष्कुल्यानाशेन विशिष्टश्रवणेन्द्रियरूपदुःखनाशे सं
यात एवमात्मसंयोगरूपव्यापारे विशिष्टस्य स्वमनः संज्ञानद्वारा दुःखरूपत्तया व्यापारनाशेन तद्विशिष्टमनोरूपदुःख
नाशसंभवादिति ~~दुःखनाशसंभवात्~~ दुःखनिवृत्त्यावात्प्रतिकत्वं च स्वसमानाधिकरणदुःखासमानकालीनत्व
न चैतादृशदुःखध्वंसस्य सम्यक्त्विकं घतत्वज्ञानसाध्यतात्स्यतिचेन्निमतत्त्वज्ञानेन मिथ्याज्ञानवासनानाशः वा
सनानाशे च दोषस्य वासनाविशिष्टरागादेरभावः विशेषणाभावे विशिष्टाभावात् तादृशरागरूपहेत्वभावे च
प्रवृत्तेर्धर्माधर्मरूपाया अभावो तदुत्पत्तिः ततस्तत्पादप्रारब्धकर्माधीनदेहात्मदेहसंबंधरूपजन्माभावे भोगतत्त्वज्ञा
नाभ्यां प्रारब्धतन्निम्नकर्मनिवृत्तिरिति जन्माभावे दुःखानुत्पादः तथा च स्वसमानाधिकरणदुःखासमानका
लीनत्वरूपविशेषणांशे तत्त्वज्ञानस्य प्रयोजकत्वात् अत एव तत्त्वज्ञानसाध्यत्वं तथा च सूत्रे दुःखजन्मप्रवृत्तिदो
षमिथ्याज्ञानानामुत्तरोत्तराभावापवर्गः इति आस्यार्थः पठितेषु जन्मादिषु मध्ये उत्तरोत्तरस्य नाशे अपायेतदनन्तराभावा
दपवर्गः हेतु अपवर्गाभावात् तथा च तत्त्वज्ञानेन मिथ्याज्ञानस्य नाशः तेन दोषाणां नाशः तेन प्रवृत्तेरनुत्पादः ते
न जन्मानुत्पादस्तेन दुःखानुत्पाद इति पूर्वोक्त एवार्थः पर्यवसितः एकविंशतिदुःखनाशस्तत्त्वकारणं साक्षा
दोत्तरापायेतदनंतरे

राम॰
११

नन्वत्र तत्त्वज्ञानस्य प्रयोजकत्वेपि वदंति न व्याप्तियोग्यविशेषणांशं प्रति स्वोत्तरवर्तिगुणानां कारणत्वात् स्वोत्तरो
त्पत्तिगुणेनैव दुःखध्वंसरूपमुक्तिसंभवेन तत्त्वज्ञानापेक्षेति दुःखपदं दुःखसाधनदुरितपरतया व्याख्येयम् दुरि
तस्य च योग्यगुणत्वाभावात् स्वोत्तरवर्तिगुणनाश्यत्वेति तन्नाशरूपमुक्तेस्तत्त्वज्ञानसाध्यत्वमेवेत्याहुः तथा चैतादृ
शापवर्गस्याभावसंशयस्य गुणसाध्यताद्य इच्छारूपस्य [illegible] प्रयोजनस्य पर्यायपदद्रव्यादिषु साध्यसाधनाभयच
ज्ञानिश्चयविषयरूपस्य इच्छा तस्य पर्यायपदद्रव्यादिषु तत्त्वान्वित्प्रायरूपस्य सिद्धांतस्य द्रव्यादिषु शाहस्व
रूपप्रतिज्ञाद्यवयवरूपाणामवयवानां गुणो व्याप्त्यारोपेण व्यापकारोपस्य तर्कस्य गुणो निर्णयस्य गुणोत त्वबुभु
त्सोः कथारूपवादस्य गुणो विजिगीषुकथारूपस्य जल्पस्य गुणत्वपक्षस्थापनाहीनकथारूपवितंडापा गुणो
अनुमितितत्कारणज्ञानान्यतरस्यातिबंधकज्ञानविषयरूपस्य गाणहेत्वाभासानां यथायथं द्रव्यादिषु अभिप्रा
यान्तरेण प्रयुक्तस्य शब्दस्यार्थांतरे परिकल्पनरूपस्य अभिधानरूपस्य छलस्य परिगणात्मसदुत्तररूपजातेर्गुणो
पराजयहेतुस्वरूपनिग्रहस्थानानां च यथायथं द्रव्यादिष्वेतन्मोवः निग्रहस्थानानि प्रतितत्त्वतिरं प्रतिज्ञावि
रोधः प्रतिज्ञासंन्यासो हेत्वंतरमर्थांतरं निरर्थकं मयार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणा

मविज्ञातार्थं

विषय

त

हानिः प्रति
ज्ञांतर

मु.टी.
१२

सत्तानमप्रतीतिभाग्विषेयोमतानन्तापर्यंतयोज्ञोपेक्षणांनिरनुयोज्यानुयोगोपसिद्धांतोहेत्वाभासाश्च अत्र च काशेनुक्तसमुच्च
यार्थकेन दृष्टान्तसाधनवैकल्यादीनापरिग्रहः तत्र विशिष्य प्रतिज्ञातस्य पक्षादेः परित्यागरूपप्रतिज्ञाहानेरभावेप
रोक्तदोषोद्भावनपर्यवसानत्वे विशेषणाविशिष्टतयाप्रतिज्ञातार्थकथनरूपस्यप्रतिज्ञान्तरस्यगुणस्वोक्तसाध्यादि
विरुद्धहेत्वादिकथनरूपप्रतिज्ञाविरोधस्यगुणस्वोक्तसाध्यादेः परेणाक्षेपणे कृते तत्साध्यापलापरूपप्रतिज्ञासं
न्यासस्यगुणपरोक्तदूषणोद्भावनपर्यवसितहेतुतावच्छेदकातिरिक्तहेतुतावच्छेदकविशिष्यकथनरूपहेत्व
न्तरस्यगुणोपक्रान्तानाकांक्षिताभिधानरूपार्थान्तरस्यगुणोऽवाचकपदप्रयोगरूपनिरर्थकस्यगुणोप
र्षत्प्रतिवादिबोधानुकूलोपस्थितिजनकवाचकवाक्यप्रयोगरूपाविज्ञातार्थस्यगुणोऽभिमतत्वाक्ता
र्थबोधानुकूलाकांक्षाशून्यपदस्वरूपस्यापार्थकस्यगुणः समयबंधविपर्ययीभूतकथाक्रमविपरीतक्रमे
णाभिधानरूपस्याप्राप्तकालस्यगुणोपत्तिकिंचिदवयवशून्याचयवाभिधानरूपस्यन्यूनस्यगुणोऽधिक
हेत्वाद्यभिधानरूपस्याधिकस्यगुणः पुनरभिधानरूपस्यपुनरुक्तस्यगुणोपरिषदात्रिरभिहितस्याप्यप्र
णानुरूपस्याननुभाषणस्याभावेपरिषदाविज्ञातार्थस्यवादिनात्रिरभिहितस्याप्यविज्ञानरूपस्याज्ञानस्या

राम०
१२

भाष्यस्यार्थस्यमार्गस्यगंगेशोपाध्यायानांसंमतिमाह ॥ अतएवेतिप

भावेउत्तराहेंपरोक्तंबुद्ध्वापिउत्तरस्याप्रतिपत्तिरूपायाअप्रतिभायाअभावेअसंभवत्कालांतरकार्यव्यासंग
व्याजकथाविच्छेदरूपस्याविक्षेपस्याभावेस्वपक्षदोषमनुद्धृत्यपरपक्षेदोषाभिधानरूपमतानुज्ञायागुणोनि
ग्रहस्थानप्राप्तवतोनिग्रहस्थानानभ्युपगमरूपस्यपर्यनुयोज्योपेक्षणस्याभावेनिग्रहस्थानानवसरेनि
ग्रहस्थानाभिधानरूपस्यनिरनुयोज्यानुयोगस्यगुणःकथायास्त्वीकृतसिद्धांतप्रच्यवरूपस्यापसिद्धां
तस्याभावेहेत्वाभासानांपूर्वोक्तलक्षणानांव्याप्त्यादिघटितभावराशेर्मरणादिसमवधानेसतिवह्निनादाहा
त्पत्तिवारणायमरणादेःकारणविघटकत्वरूपप्रतिबंधकत्वान्यथानुपपत्त्यासिद्धायाःशक्तेःषड्भावे
ष्वनंतर्भूतत्वादतिरिक्तत्वमितिप्राभाकरादयःसत्यकीर्तितातातिमलमपहामित्यभिप्रायेणप्राभाकरशैक
तेनमणिमंत्राद्यभिभूतेतिहोत्यपरार्थोतिरिक्तोसदपेः अतिरिक्तपदार्थतामेवव्यवस्थापयतितथाहित्यादिना
मरणादिनामंत्रौषध्यादिपरिग्रहःसमवहितेनमणिसमीपस्थितेनाग्नेउवह्निरूपकारणाभावादिव
नदाहइतिनमरणादेःप्रतिबंधकत्वमतःसमवहितेनवह्निनापितदाहाकरणात्पत्तिरप्यतिरूपवह्निरूपपरा
वृत्तिर्वामणाद्यतिरिक्तप्रतिबंधकत्वंखंडयतिनत्वत्यन्नतिमणीसमवधानमुत्पन्नेसपः नन्ववहापदि
श्वात्र्यासोचेवमन्हेनिषेदहातुकूलतेत्तिरूपकारणाविघटकतयेवानिर्वहतीतिमण्यादिप्रतिबंधकता

मु.टी.
२४

न

दाहमनुकूलाशक्तिस्तदामरणपादिसत्वेकुतो न दाहस्तत्राहतत्वेति एवोक्तपुनर्नाशशक्तिसिद्धाविति अर्थः दाहानुकूलेति अ
त्रवानुकूलत्वं कारणतदवच्छेदकसाधारणं तेन शक्तेः कारणतानवच्छेदकत्वेपि क्षतिः ना स्यत इत्यस्य इति कल्प्यतत्वत
नेनाच्युपः तथाच्चचाद्रिनिष्ठशक्तित्वावच्छिन्नप्रतिमणित्वेन नाशकत्वस्वीकारेण मणादिसत्वेद शायां शक्तेर्भा
वादेव न दाह इति भावः ननु मणादेः यदि शक्तिनाशकत्वं तदा सत्युत्तेजक विशिष्टमणादौ अप्र स्याद् इति वा
दाहानापत्तिरित्यत आह उत्तेजकेनेति मणाद्यपसारणेन चेत्यत्र चकारो वाकारार्थेन चदाहं प्रति मणाप
भावत्वेन हेतुत्वकल्पनान्तमणिसमवधानकाले दाहापत्तिरिति वाच्यं मणाभावत्वेन रूपेण स्वतन्त्रहेतु
ताकल्पनेगौरवात् विलक्षणाशक्तिमत्वेन वह्नेः कारणत्वकल्पनस्यैवोचितत्वादिसमिमानात् कनेवेश
क्तिसिद्धावपि तस्यां अतिरिक्तत्वासिद्धिरिति चेन्न उक्तपदार्थेष्वनन्तर्भूतत्वात् न योहि न तावदद्रव्यानि
काशक्तिः गुणादिवृत्तित्वात् अतएव न गुणात्मिका कर्मात्मिका वा न च समानाधन्यन्तर्भावः पोक्तिमत्व
स्यतिविनाशित्वादिति एवमतिरिक्ता शक्तिः प्रमाध्यसादृश्यस्यातिरिक्तपदार्थत्वापत्तिः स्यात् प्रपंचितिरेव मित्या
दिनाअतिरिक्त इति ल्मृतसप्तपदार्थातिरिक्त इत्यर्थः घट्टावान्तर्भूतत्वे सति अभावानन्तर्भूतत्वादिति

रा॰
२४

४ तर्भावमात्रं स्यन्निरा चेषे नापीति पद्यपि अतिरिक्ताभावमनंगी कुर्वतः प्राभाकरस्य मतेनाभावे भावेषु ४
ति

हेतुः सपरपक्षः तत्र सत्यं तासिद्धिं निरस्यति तत्सादृश्यस्य हि हेतौ सामान्येपि सामान्येतरवृत्तित्वे सति सामान्यवृत्ति
त्वादित्यर्थः तेन सामान्यत्वेन व्यभिचारः व्यतिरिक्तत्वसतीति विशेषणान्न प्रमेयत्वादेर्व्यभिचारः भावत्वे घटत्वादि
घटकान्यतमत्वरूपे हेतुमति साध्यस्य सत्वाच्च व्यभिचार इतित्र येपि सा हरस्यत्वादा वृत्तभूतं तदादद्व्यादेः सा
मान्यावृत्तित्वेन पक्षागोत्वेनित्यतथा च त्वमित्यबाधितमती तिन्स्यादित्यर्थः अभाववन्तर्भाव विचिंतानसंभव
तित्तथापि परमतमस्युपेत्यसंदेनिराकृतमिति भावः सत्वेन भावत्वेन प्रतिपमानाभावात् प्रमीयमाणत्वात् म
णिसमवधानकालीन वह्नि नाशस्त्वीकारगाप्य आमाकरेणसाधितां शक्तिं हृदयपति मणाद्यभावेति अतिरिक्तशक्ति
कल्पनां पूर्वोक्तनाश्यनाशकभावकल्पनां चापेक्ष्य लाघवादाहत्वावच्छिन्नप्रतिमणाद्यभावत्वावच्छिन्नेव हेतुत्वकल्पनं च
ल्प्यमुचितमिति भावः दाहादिकमित्यादि पदेन वह्निसंयोगः मणिसत्वेव दृश्यतस्तेन तथाच मणिरूपप्र
तिबंधकसत्वाच्चान्न दाहवन्हिरिति भावः ननु पदा कदाचिन्मणाभावविशिष्ठ इहे दाहापत्तिः कारणता
वच्छेदकावलीढकारणसत्वस्यैव कार्योत्पत्तिनियामकत्वात्तस्माद्यभावविशिष्टवह्नित्वं वह्निविशिष्ट
मणाद्यभावत्वं वाकारणतावच्छेदकमस्तु अविशेषणाविशेष्यभावे विनिगमना विरहेण गुरुभूतकार्य

त्वं १

मु.टी.
१९

कारणाभावव्याप्यापत्तिः स्यादत आह मण्याद्यभावादेरिति तथा च प्रतिबंधकत्वेन कार्यानुकूलधर्मविघटकत्वं वा
धत्वानवस्थानुमितिप्रतिबंधकत्वाभावापत्तेः किंतु कारणीभूताभावप्रतियोगित्वं तच्च मण्यभावस्यैव हेतुत्वे ए
वोपपद्यते न त्वतिरिक्तशक्तिसत्त्वे इति भावः ननु प्रतिबंधकस्य हेतुत्वे कारणीभूतवह्निरूपाभावप्रतियोगित्वेनेऽस्य
भावेऽतिव्याप्तिः स्वरूपाभावप्रतियोगिनि घटादौ चेति चेन्न तादात्म्यातिरिक्तसंबंधावच्छिन्नाप्रतियोगिताकारणतात
स्य प्रतियोगिभूतो योऽभावः भिन्नोऽत्यंताभावस्तत्प्रतियोगित्वस्य विवक्षितत्वात् कारणताविशेषाभावानां चैवमति
ताभावप्रत्यक्षे सुखस्य प्रतिबंधकत्वापत्तिः प्रत्यक्षविषयस्य तादात्म्यसंबंधेनैव प्रत्यक्षे हेतुत्वात् ननु वह्नि
मण्यभावयोर्दाहे हेतुत्वे प्रातिरिक्तशक्तेरेकस्या एव हेतुतायुक्ता लाघवादित्यत आह अन्येनैवेति
दाहे प्रतिबंधकमणेः प्रतियोगिकत्वे यो शक्तिनाशः मणेः शक्तिमणप्रसहस्रप्रत्यक्षकार्यकारणभावकल्पना
पि स्यादित्यपि बाध्यं उत्तेजकाभावविशिष्टमणिप्रतिबंधकः किंतु उत्तेजकाभावविशिष्टस्तद्भाव
श्चोत्तेजकसमवधानकालेऽपि तिष्ठतीति न व्यभिचार इति भावः अप्रमाणविस्यलोपदाहेम स्वोत्तेजकस्यैव हे
तुतास्त्विति चेन्न तस्यानन्वगतत्वात् तावद्भावचक्रशक्तिविशिष्टमण्यभावस्यैवानुगतत्वात् अत्र देवाधि
४६ कृं प्रतिमण्यभावादेर्हेतुत्वकल्पनेनैवेत्यर्थः सोत्तेजकस्य मणिसमवधाने दाहादर्शनाद् आह
भावेऽपि नाभावादाह ॥४

एम०
१५

अभावीयविशेषणतासंबंधेन दाहत्वावच्छिन्नं प्रत्युत्तेजकत्वाद्देशिकविशेषणतान्यतरसंबंधावच्छिन्नप्रतियोगिताका
नोत्तेजकाभावस्याभावीयविशेषणतासामान्याधिकरण्यरूपं यद्वैशिष्ट्यं तदवच्छिन्नस्य मणेर्दैशिकवि
शेषणतासंबंधावच्छिन्नप्रतियोगिताभावस्य संबंधेन हेतुत्वमिति तेन संयोगसंबंधावच्छिन्नप्रतियोगिताकमण्य
भावस्य तत्स्थानेऽपि सत्त्वान्न दाहापत्तिः ननु अनुमानमेव शक्तौ प्रमाणं तथाहि वह्निर्दाहानुकूलातीन्द्रिय
धर्मसमवायी दाहजनकत्वात् अत्र वह्निरिति वह्निर्घटकत्वमादाय सिद्धसाधनवारणाय दाहजनकपदं सिद्धे निष्ठानन्तरूप
मादाय वा सिद्धसाधनवारणाय अनुकूलेति वह्निघटकधनसंयोगमादाय पर्यवसान संयोगमादाय वा तद्वारणा
यातीन्द्रियेति चक्षुरिन्द्रियस्पर्शमादाय तद्वारणाय तीन्द्रियेति विपक्षबाधकतर्कविरहेणास्यानुमानस्याप
योजकत्वात् केचित्तु वह्निरेवं प्रतिबंधकत्वादि फूत्कारसंयोगत्वादिरूपेण कारणतायाव्यभिचा
रेणासंभवादिति युक्तमिति नवत्रापि कारणतावच्छेदकमणेः किंचित्संबंध
स्याजन्यतावच्छेदकं किंचिद्विजातीयत्वं केऽपीति न व्यभिचार इति वाच्यं तज्जन्यतावच्छेदकवैजात्य
त्रयकल्पनेऽपि स्यात् तत्संबंधानामकत्वं तन्मत्वेन कारणत्वकल्पनापेक्षया लघुत्वेन न्याय्यत्वादि
म

साध्ये दाहानु

उभयोर्विशेषणविशेष्यभावे [illegible] विनिगमनाविरहेण कारणतावच्छेदकं भेदस्य कारणतावाहुल्यमिति वाच्यं।
त्वादिकमन्तर्भाव्य तत्संबंधसाधारणैककार्यतेरेवास्तु यगमात्तन च योग्यवृत्तिजातेर्योग्यत्वापत्तिरिति वाच्यम् दोषविशेषणा
प्रकैर्विषयायोग्यत्वकल्पनात् तेन चनोदनात्वादिना संकरस्यादोषत्वात् अन्यतमत्वेन कारणता संभवाच्च न तच्चा
न्यतमत्वघटकभेदानामेव नियतत्वात् नैमिदानीमेकेन कारणतावच्छेदके संभवात् न च भेदानां स्वरूपताव
च्छेदकत्वासंभवेन तत्तत्प्रकारसंयोगभेदविशिष्टकारणताभिन्नं यत्संबंधभेदावच्छिन्नप्रतियोगिताकभेदत्वादिना
अवच्छेदकत्वं वक्तव्यं तथा चावच्छेदकतावच्छेदकभेदादवच्छेदकताभेदस्तन्मेदेन च कारणताभेद इति वा
च्यं स्वरूपसंबंधरूपाया अतिरिक्ताया वा कारणताया अवच्छेदकताभेदप्रभेदादित्यन्यत्र विस्तरः॥ परं तु र
णादिसंबंधकालीन वायुसंयोगाः शनामृकशक्तिमत्त्वे नहि तुता मादाय विनिगमनाविरहात् शक्तिसिद्धिरे
वादाशंक्य तत्साहस्थ्यमप्यतिरिक्तः पदार्थ इति तदपि निराकरोति साहस्थ्यमपीति॥ तिरिक्तोऽपि सतीति॥ इह च साहस्थ
निरूपकेति व्याप्तिवारणाय अनुयोगिता संबंधेन विवक्षणेनैव उदयभवातिवदत्राभावधर्मं वक्तव्यमिति॥ तत्र साध्या
त्वापत्ते विद्यमानाय अभ्युपसाधर्म्यात् वृत्तिमित्यर्थः॥ तन्निरवणेन गोणानाकार्यसंयोगिपमः॥ सामरावणयोरिति सम
वणयोरिवेत्यादावव्याप्तमिति चेन्नाति धृतिधर्ममात्रस्य तत्र विवक्षितत्वात् रयगभेदे विवक्षया भेदसत्त्वाद्॥ अत

४ इदं विशिष्टमालीत रणसंबंधे प्रमे ४ विरण साहार॥२

मु.सी. २६

मु.: ५८

एवं युगभेदविवक्षायां मिहोपमालंकारः अस्पदानन्वपालिकारस्तत्प्रत्युक्तमालंकारिकैः॥ साहस्थ्यघटकधर्मे क्वचिज
जातिरूपे यथा घटपटसाहस्यं॥ क्वचिद् उपाधिरूपे यथा गोत्वं तत्वम्पत्वेन यत्वादौ यथा वा चंद्रसाहश्यं मुखमित्यादावा
ल्हादकत्वादि अतिरिक्तकल्पने गौरवादितिन च कास्तु साहस्थ्यमतिरिक्तमेव न चातिरिक्तत्वपदार्थविभागव्याघात इति
वाच्यं॥ तस्य सप्तानामेव पर्यवसितत्वात् नापदार्थविभाग प्रमात्र निरूपणपरत्वात्॥ एवमेव विकरणत्वमपि॥ तस्य संयोगा
दिस्वरूपत्वे वदरकुंडसंयोगस्य हि वृष्टत्वेन कुंडवदरमिति विद्वदरकुंडमित्यपि प्रयोगस्यात्॥ एवं प्रतियोगित्वमपी
त्याहुः॥ सिंहस्य फलस्य तोलस्य प्रोजयतीत्यर्थः॥ क्षिपाति क्षितिमंत्रविहितं तत्किं न मत्यय्यंत क्षितिशब्दस्य स्थयवाव
कत्वा क्षितिपदस्य प्रकृते तात्पर्यग्रहिन मत्यमाह॥ क्षितिः स्यावीति॥ अपरस्य अन्य जित्यादिया नीप संत्रेश
कृपरत्वादाह॥ आपातललानीति॥ प्रतापस्यापि तेजःशब्दवाच्यत्वात् प्रकृते तेजःपदार्थं प्रदर्शयति॥ वह्निरिति॥ व
ह्न्यादिरित्यर्थः॥ देवविशेषस्याभिप्रायेऽपि ग्रहवाच्यत्वात् प्रकृते तत्पूर्वोगिन मत्यमाह॥ मरुद्वायुरिति॥ व्योमशब्दस्य वेद
वस्त्राणीपयोगादाह॥ व्योम आकाश इति देहविशिष्टा यद्के नैनं तद्देहि शब्दात् देहावयवानामुपस्थितिराह॥ देही
आत्मेति॥ अर्थ ईश्वरस्य देहिनां मध्ये अन्तर्भावात्कथं द्रव्यत्वमिति चेन्न देहाभिमानित्वेन अन्यायेन ईश्वरस्य शरीर

२कालशब्दस्यांत्यादिबोधक साहाह्य कालः समय इति॥२

रमिदंति॥ संसायेत्यत्र द्रव्यत्वं शरीरमित्यन्ये॥ स्त्वरूपा स्वरूपादन्तैमिति पृथिव्यप्तेजो वाय्वात्मानः इति पंचेव द्रव्याणि योमादेरीश्वरात्मन्येवांतर्भावात् मनस आत्मसमवेतत्वात् तेनैवांतर्भावादिति नवीनाः आहुः स्तन्मतं निराकर्तुं संख्याबोधकपदप्रयोगनार्थमाह॥ एतानि नवेति॥ व्योमस्तावच्छब्दाश्रयत्वेन सिद्धिः॥ नचेश्वरभावतस्य शब्दाश्रयत्वं॥ अस्यैकत्वे वा कालादेः पृथिव्यादिविनिगमनाविरहात्॥ नचेश्वरो वा नानामोश्रयत्वेन शब्दो वा नहि भित्ति मत्यस्तापेत्तिः॥ अहहव्यवदेयापृत्तस्यैवकल्पनात्॥ कालदिशो स्तृणेतस्मिन्कालपटः पूर्वस्यां दिशि घटइत्यादि घटेकतात्कारप्रत्ययात्॥ मनसस्तु समवेतभत्तत्वे पृथिव्यादित्वेनैरगुणादापविनिगमनाविरहरत्याशापाशः अधिकमग्रे व्यक्तीभविष्यति॥ मूले द्रव्याणीति॥ द्रव्यपदं द्रव्यत्वरूपेण ज्ञातिविधायकं॥ ननुरीत्वाश्रयविशिष्टार्थकं गौरवात्॥ युक्तो व्याकिंच मासामिति किंशतः प्रश्नः॥ ननु द्रव्यं द्रव्यमिति अनुगतप्रतीतिरेवजातिसाधिका सविपरीतत्वात्त आह॥ नहीति॥ तत्र॥ द्रव्यत्वज्ञातो॥ घटेति॥ तथाच घटादिषु पृथिव्यादिद्रव्यत्वज्ञानाभावेन सकलद्रव्यसाधारण द्रव्यत्वजातिसिद्धिर्न भवतीति भावः॥ कार्येति॥ कार्यत्वंप्रागभावप्रतियोगित्वं॥ नचध्वंसस्य साधारणत्वात् तत्वविशेषणीयत्वात् अत्रच कार्यस्य समवायः प्रत्यासत्तिः कारणस्य तादात्म्यं यत्र समवायेन कार्यं तत्र तादात्म्ये

अत्रगुणवत्वमेवद्रव्यत्वसंबंधघटकं

नीले

न द्रव्यमिति नियमात्॥ ननु जन्यसत्त्वरूपकार्यत्वावच्छिन्नं प्रति तादात्म्येन द्रव्यत्वेन कारणत्वे मानाभावः॥ नचैवं नीलोत्पत्तिवारणाय तथा हेतुत्वमावश्यकमिति वाच्यं॥ समवायेन नीलं प्रति स्वाश्रयसमवेतद्रव्यत्वसंबंधेन नीलहेतुत्वेनैव तद्वारणात् कीं कार्यत्वस्य घ्रपसमवेतकार्यतावच्छेदकत्वे गौरवात्॥ कालिकसंबंधेन घटत्वादिकमादाय विनिगमनाविरहाच्चेत्यत आह॥ संयोगस्येति॥ अत्रच रूपादिगुणानां सकलद्रव्यसाधारणाभावेन द्रव्यकार्यतया परित्यागः सकलद्रव्यवृत्तिसंख्यादित्रयस्य वा गगनादिवृत्तिसंख्यादित्रयस्य नित्यत्वात्॥ नचसंयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन समवायिकारणत्वमानाभावस्तत्तद्व्यक्तिसमवेतसत्तासामान्यं प्रति तत्तद्व्यक्तित्वेन समवायिकारणत्वस्यावश्यकतया गुणादौ तदुत्पादासंभवादिति वाच्यं॥ कार्यमात्रवृत्तिजातेः कार्यतावच्छेदकत्वनियमेन तादृशकारणत्वस्यावश्यकत्वात्॥ नित्यसंयोगोगीकारे तत्साधारण्यमाह॥ विभागस्यचेति॥ द्रव्यत्वसिद्धेः॥ जातिरूपद्रव्यत्वसिद्धेः॥ क्वचित्तु थेव पाठः॥ अत्र यद्यपि गुणवत्त्वेनान्यथासिद्धिः संभवतिति तथापि सामान्यसंबंधमेवाधेमत्यवानुमितेः परंपरासंबंधविषयत्वमिति भावः इदमुपलक्षणं॥ द्रव्यवृत्तिद्रव्यान्तरानुसत्तासमवायेन द्रव्यसमप्रतिबंधकत्वं कल्पनीयमिति प्रतिबंधकतावच्छेदकतया द्रव्यत्वसिद्धिः॥ प्रतिबध्यतावच्छेद

(द्रव्यत्वं

मुक्ती०
१८

कं च रूपयित्वादिवत् स्वरूपमात्रवृत्तित्वमेव नित्यत्वं व्यावर्तकत्वात् भूतत्वस्य प्रतिबंधकतावच्छेदकत्वे तु मूर्तत्वस्य
तथात्वमादाय विनिगमनाविरहापत्तिः द्रव्यस्य प्रतिबंधकतावच्छेदकत्वे तु धर्मिग्राहकमानसिद्धं ॥ न च तमसा
गगनादिवृत्तित्वमानाभाववत्ति वाच्यं ॥ भूतत्वेन तस्य वृत्तिकत्वापत्त्या विनिगमनाविरहेण गगनादिपंचवृत्तित्वा
[illegible] स्यपामातरा । न च मूर्तत्वेन तस्य व्याप्तिवृत्तित्ववारणाय मनो
वृत्तित्वमेव द्रव्यत्वे कल्प्यतां ॥ गगनादिवृत्तित्वकल्पने गौरवात् । गगनादिवृत्तित्वकल्पनेपि मूर्तत्वेनैव साकं प
वारणाय मनोवृत्तित्वावश्यकत्वादिति वाच्यं । तथा सति मूर्तत्वेनात्माद्रव्यत्वप्रसंगात् तस्य वाजिवृत्तित्वापत्तेरिति तन्
तु दशमद्रव्यस्य तमसः सत्त्वाच्च वह्नव्याप्तिरित्युक्तमित्यभिप्रायेण मीमांसकः शंकते । नन्विति ॥ नन्वत्र तमसि मा
नाभावादेव न व्याप्तमित्याशंक्य तमसः साधकं प्रत्यक्षप्रमाणमाह । तद्धीति ॥ तमो हीत्यर्थः ॥ प्रत्यक्षेणाप्यच्छ
रिंद्रियेण ॥ ननु तमसः सिद्धावपि तस्य द्रव्यत्वे किं मानमित्याशंक्यानुमानं प्रमाणमाह ॥ तस्येति ॥ तमस इत्य
र्थः ॥ चकारो द्रव्यत्वमित्यनेन नान्वेति ॥ तथा च तमो द्रव्यं रूपवत्त्वादित्यनुमानं तत्र द्रव्यत्वे प्रमाणं सचितं
॥ इदमुपलक्षणं ॥ परत्वाश्रयत्वादित्यपि बोध्यं । इदं तमः परमिदमपरमिति प्रतीतेः ॥ ननु तमसि रूपमाना

परत्वा०

त्व
गत
नत
म०
गम०
१८

मर्हति ॥ ननु तमसो द्रव्यत्वे आलोकनिरपेक्षेण चक्षुरिंद्रियेण ग्रहणं न स्यात् द्रव्यग्रहे त्वालोकसापेक्षचक्षुरिंद्रियस्य हेतुत्वात् [illegible]

भावान्न च नीलं तमः इति प्रतीति [illegible] त्यात् तत्सिद्धिरिति वाच्यं ॥ प्रतीतेर्भ्रांतत्वादित्यत्र हेत्वंतरमाह । कर्मवत्त्वादिति कर्मवत्त्वं
च समवायसंबंधेन विवक्षितं । तेन जन्यमात्रस्य कालिकसंबंधेन कर्मवत्त्वेपि न व्यभिचारः । न च स्वरूपासिद्धिः
चलति छायेति प्रतीत्या कर्मवत्त्वासिद्धेः तमसः ज्ञातृद्रव्यत्वं भावे निराकुरुते ॥ तद्धीत्यादिना ॥ गंधेति ॥ गं
धाभावस्य हेतुत्वोक्तौ पटगततत्प्रतियोगिताकाभावमादाय घटे व्यभिचारः स्यादत उक्तं ॥ हेतुत्वप्रतियोगि
व्यधिकरणः समवायसंबंधावच्छिन्नप्रतियोगिताकः प्रविवक्ष्यः ॥ तेन नात्यन्तिककालीनसंयोगसंबंधावच्छि
न्नगंधाभाववतीति च घटे व्यभिचारः ॥ नीलरूपमिति ॥ अनुगतत्वेनैकनीलरूपग्राहकजनाज्ञैर्घटकभेदसिद्धेः स्वाहा
भावभास्वररूपाभावादीनामनुगतत्वेनान्नहेतुतया पन्यासः जलादिकमित्यादिनात्तत्प्रभ्यातिद्रव्यसंग्र
हः ॥ तथा च नवसु द्रव्येषु तमोभावासंभवेन परिशेषेण तमसोधिकद्रव्यत्वसिद्धिरिति भावः ॥ तदुक्तं
॥ तमः खलु चलं नीलं परापरविभागवत् ॥ प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हतीति ॥ तत्रेत्यादि आह ॥ तत्रेत्य
स्येवेति ॥ तमः प्रत्यक्षेचाप्यर्थः ॥ तमसि भिन्नद्रव्यचाक्षुषत्वावच्छिन्नप्रत्यक्षसंयोगसंबंधेनालोकत्वेनक

लो०

रणाप्त्वावधारणादितिभावः॥ आवश्यकत्वेनाभावेनेति॥ प्रकृष्टमहत्त्वोद्भूतानभिभूतरूपवत्त्वस्त्वाचक्षित्त्वाभावेने
त्यर्थः॥ अथ कारणाभाव एव तेन: किं तस्याविति तु न स्यात्कंटुम स्य यथाभवितरूपवद्धतस्तपयत्नेशितिमचनापा बूयप
कपदं॥ उपपत्तौ॥ तमोव्यवहारोपपत्तौ॥ ननु तमसत्तेनाभावत्वे रूपवत्त्वाप्रतीतिः कथमभावे रूपाभावादिस
त आह रूपवत्त्वेति॥ ननु रूपवत्त्वाप्रतीतेर्भ्रान्तित्वेपि [illegible] चलतीतिप्रत्ययसिद्धकर्मवत्त्वहेतुना
तमसि रूपवत्त्वमुत्पत्तौ सत्त आह एककर्मवत्त्वाप्रतीतिरपीति॥ नहि द्रव्यस्योपाधिकीकर्मप्रतीतिरितिभावः
॥ ननु प्रतीतेर्भ्रान्तित्वं तत्रैव स्यात् यत्र उत्तरकालबाधस्तानं प्रवृत्तेहत्तमानचलतीति उत्तरकालेबाधस्ता
नाभावात्कथं प्रतीतेर्भ्रान्तत्वमित्यतो दूषणान्तरमाह॥ तमसइति॥ आवरणवादीत्याशिनाउत्पत्तिध्वंसप
रिग्रहः॥ पञ्चाग्रेपि तनीलरूपंतमइति कंदलीकारमतं तत्र॥ इहान्धकार इति प्रतीतेरपि भ्रमत्वापत्तेः॥ तमो
नीलमितिनीलिमानमप्यपास्य॥ ननु तमसोनीतिरित्यत्रापि सवर्णस्यातिशक्तस्पद्रव्यसत्त्वानुवृत्तेर्व्याघात
स्तदवस्थ एवेत्यत आह॥ सवर्णास्येति॥ वस्तुतइतितमो निरूपणावसरे तिर्यक्ष्॥ कठतेइति॥ रूपरसगं
धस्पर्शाःसंख्याःपरिमाणानिपृथक्त्वसंयोगविभागौपरत्वापरत्वेबुद्धयःसुखदुःखेइच्छाद्वेषौ प्रयत्नाश्च गु

णाइतिविभागस्त्रेमत्यचशाकंठोक्ताः॥ चशब्देन॥ मत्रस्यचशब्देन॥ गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाः सप्तस
मुच्चिताः॥ तेचसर्वे एकत्र या चतुर्विंशतिगुणा इत्यवधृताः॥ ननु चतुर्विंशतौ किं नाम गुणत्वं॥ न च जातिविशेष
॥ तत्र प्रमाणाभावादित्यत आह॥ तत्रेति॥ तेषु गुणत्वं त्वित्यर्थः॥ अयं॥ गुणनिरूपणावसरे॥ वक्ष्यतइति॥ द्रव्यक
र्मभिन्न [illegible] सामान्यवतितयाकारणतासाकिंचिद्धर्मावच्छिन्नाकारणतात्वावच्छिन्नत्वमानं गुणत्वजा
तौप्रमाणमितिभावः॥ एतत्तत्त्वंतत्रैववक्ष्यामीभेविष्यतिप्रत्यक्षसिद्धेति॥ चलनात्मकानुगतप्रत्ययवेद्यत्वपथ
॥ अधिकतत्पदीति॥ क्रमविभाजकोपाधिभिःकर्मणांत्वादिभिः॥ मनोसमनादवृत्तिः॥ अयंचमुत्क्षेपणादीना
मपिगमनादवलम्भेउत्क्षेपणत्वादिभिरपिविभागानुमितः॥ नत्सुक्षेपणादोगमनत्वनानुभाविकं॥ ऊ
र्ध्वमधश्चप्रमित्यलोष्ठादौकूर्ध्वंगच्छत्यधोगच्छतीतिप्रत्ययादितिचेन्न॥ स्वतंत्रेच्छस्यमुनेर्नियोगपरिप्यागा
नहेत्वादिति॥ तथ्यत्वसंगात्रिति॥ लक्षणाप्रयोजनं वितरभेदस्य व्यवहारस्य वासिद्धिः॥ सामान्यमिति॥ सा
वादिस्थ्यानिधृतेसामान्यमिति व्यवहारविषयावानित्सत्वेसतिअनेकसमवेतत्वात्॥ एवंवनेतत्रैव॥
यथाद्रव्यमिति॥ एवंलक्षणान्तरप्युह्यं॥ अनेकेति॥ अनेकत्वमेकभिन्नत्वं॥ जलपरमाणुरूपादावतिव्या

सिवारणाय पृक्तो विशेषपभागः समवेतत्वघटकसमवायफलमाह॥ नित्यत्वे सत्यनेकवृत्तित्वमिति॥ न चैवं नित्यसं
योगे तिव्याप्तिरिति वाच्यं॥ तस्य निरस्तत्वात्॥ कुतो निरास इति चेन्न॥ द्व्यनिरूपितसंयोगानिष्ठकार्यतावच्छेदक
कारणत्वस्य तन्निवेशगौरवात् नित्यसंयोगानंगीकारेण नयसंयोगत्वस्य नित्यत्वे निखिलकार्यतानवच्छेदकत्वाच्च तस्य
पृक्तानित्यविभागासिद्ध्यापत्तेश्च॥ नन्वाकाशत्वरूपजातावव्याप्तिस्तस्या अनेकसमवेतत्वाभावादित्याशंक्य
लक्षणत्वेनान्तरमाह॥ एकमात्रेति॥ व्यक्त्यभेदरूपबाधकसत्त्वादिति शेषः॥ अन्यगतविपयाजातिकल्पिकाया अ
लक्षणत्वेनान्तरमाह॥ भावादिति भावः॥ ननु व्यक्त्यभेदस्य जातिबाधकत्वमेवासिद्धं निःसामान्यविशेषास्तु वृत्तिसमवेतत्वस्य
भावादिति भावः॥ ननु व्यक्त्यभेदस्य जातिबाधकत्वमेवासिद्धमित्याशंक्याह॥ तेचोत्तमिति द्रव्यकिरणावल्यामुदयनाचार्यैरिति शेषः॥ बहुवक्त्येकेष
जातिलक्षणात्वादित्यत्तःसंमतिमाह॥ ननु बाधकत्वमेव॥ व्यक्तेरभेदः॥ एकव्यक्तिकत्वमाकाश
मत्स्यैव सामान्यतया सर्वसिद्धत्वाद्वैकव्यक्तो जातिरनभ्युपयपेति भावः॥ व्यक्तेरभेदः॥ एकव्यक्तिकत्वमाकाश
त्वादेर्जातित्वबाधकं॥ तुल्यत्वं॥ तुल्यव्यक्तिवृत्तित्वं॥ घटत्वकलशत्वादौ नाजातौ नो भेदः॥ वस्तुतस्तु तत्व
तुल्यव्यक्तिवृत्तित्वं॥ सभिन्नजातिसमनियतत्वमिति पर्यवसन्नं॥ तच्च जातिबाधकमेव निष्प्रयं॥ संकरश्च पर
स्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशः॥ भूतत्वमूर्त्तत्वादेर्जातित्वे॥ भूतत्वं विहाय मनसि मूर्त्तत्वमात्र

(आदिनोक्तबाधकः परिग्रहः १)

(जातेर्व्यावर्त्तकत्वं यथासंभवति तथा वाच्यं यथा विशेषस्य व्यावर्तकत्वं जातिरहितत्वेनैव तथापि स्वतो व्यावर्त्तकत्वं संभवति इति भावः तथापि जातेरपि व्यावर्तकत्वं
तथापि हेत्वात दष्टाश्रयत्वेन व्यावर्तकत्वे संभवति तत्वाभावेन स्वतो व्यावर्तकत्वमिति भावः न स्मात् [illegible] मालस्य स्वतो व्यावर्तकस्य तत्वे हानिः साधुसंगच्छते विशेषत्वजातेर्व्या व
र्तकत्वानि प्रयोजकत्वे तु तदसंगतिः स्यादित्यलम्पल्लवितेन २)

स्य मूर्त्तत्वस्य मूर्त्तत्वं विहाय गगने भूतत्वमानस्य भूतत्वस्य पृथिव्यादिचतुष्टये सत्त्वात्॥ ननु सांकर्यस्य जातिबाधक
त्वे किं मानमिति चेत्स्वसामानाधिकरणस्वाभावसामानाधिकरणोभयसंबंधेन जातिविशिष्टजातित्वावच्छे
दकत्वसमानाधिकरणाभावप्रतियोगित्वाभावनियमस्य भंगप्रसंग एवेति॥ तादृशनियमसमानाभावान्न सांक
र्यं जातिबाधकमिति नव्याः॥ अनवस्थां तज्जातेर्जातिमत्त्वे॥ यद्यपि निखिलजातिषु एकं वैजात्यं [illegible]
ंगीकारे पृथक्वैजात्ये न वैजात्यांतरमेकव्यक्तित्वात्तथापि निखिलजातिष्वेकं वैजात्यं तदवैजात्यं तदाश्रयजा
तिषु पुनर्वैजात्यमेवमयपीत्यनवस्थावाध्या॥ रूपहानिरिति॥ निःसामान्यत्वपर्यन्तलक्षणव्याघातरूपा विशे
षस्य जातिमत्त्वे रूपस्य स्वतो व्यावर्त्तकत्वस्य हानिः॥ तत्र जातिस्वीकारे तेषु व्यावर्त्तकत्वं वाच्यं सामान्या
श्रयस्य सामान्यरूपेणैव भेदसाधकत्वनियमात्॥ न च सामान्यरूपेणाविशेषाणां भेदकत्वे संभवति
व्यभिचारात्॥ तादृशनियमानंगीकारे परमाणौ तत्कृत्वादीनां तत्तद्व्यक्तित्वेनैव परमाणुतरभेदस्य
भकत्वसंभवेन विशेषस्य वैयर्थ्यप्रसंगादिति तत्त्वार्थः॥ असंबंधः॥ प्रतियोगितानुयोगितान्यतरसं
बंधेन समवायाभावः समवायाभावयोर्जातिमत्त्वे इति॥ तदपि स्वरूपाचेति॥ सत्ताया स्वरूपाचस्यर्थः॥ सत्ता

(अनुयोगितया भावस्याभावत्वे जातित्वसंदेहे दुर्निरूप्येयं तथा स्वव्यतिरिक्तसमवायाभावस्यानध्यात्वेनान्यभेदं च रूपत्वेन तत्स्य तत्त्वात्वेन स्या
दतः प्रतियोगित्वस्यानि वेशः १)

(अंगीकृते वैजात्य
एव संसर्गः)

मु. टी. २१

[illegible] त्तातिश्च द्रव्यं सत् गुणसंन्नित्या
घनुगतप्रतीत्यैव सिद्धेरिति॥ अत्र व्यांनुः॥ सान्नित्यत्वं विषयाभावत्वमेव॥ अत एव सामान्यादिष्वपि सदिति व्य
वहारः॥ नन्वतिरिक्ताद्द्रव्यादित्रिकवृत्तिनीसत्ताख्याजातिरिति तेन परमपरं द्विविधं सामान्यं परं सत्तैव शेषकविभाग
निपेक्षिकत्वादनादेयपरत्याहुः॥ तन्नमतः॥ ध्वंसकारणत्तावच्छेदकतया सत्ताजातिसिद्धेः॥ यत्र प्रतियोगितासंबंधेन
ध्वंसोत्पत्तिस्तत्र तादात्म्यसंबंधेन सदिति सामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभावात्॥ न च प्रागभावेप्य
भिचारः॥ प्रागभावसत्त्वाविरहादिति वाच्यं॥ प्रागभाववत्त्वप्रतियोगित्वाभिन्नप्रतियोगित्तोयाः कार्यतावच्छेद
कसंबंधत्वादिति॥ वस्तुंसत्त्वावच्छिन्नप्रतितादात्म्येन द्रव्यत्वेन कारणत्वे न्याय्ये नात्तावच्छेदकतया सत्ताजातिसि
द्धेः॥ तादृशकार्यकारणभावमानाभावादिति तु न॥ स्वाश्रयसमवेतत्वसंबंधेन नीलादे नीलादावपिस
त्वात् तत्र नीलापत्तिवारणाय तादृशकार्यकारणभावस्यावश्यकत्वात्॥ न च स्वाश्रयसमवेतत्वविशि
ष्टद्रव्यत्वसंबंधेन नीलादिहेतुतयैव न तदापत्तिरिति वाच्यं॥ तादृशसमवेतत्वद्रव्यत्वयोर्विशेषणवि
शेष्यभावविनिगमनाविरहेण कारणतावहुत्वापत्तेः कालिकसमवायोभयसंबंधस्य कार्यतावच्छेदकत्वे तावच्छेदकत्वे

राम० २१

तद्रू. ५

वि २

ति ३

अत्र स्वाश्रयभिन्नलिंगजन्यत्वानुपादाने विशेषविशेषानुमितिविषयत्वेनासंभवः॥ विशेषविशेष्यके तदनुपादानेपि घटो विशेषभिन्नो घटादिरनुमितिवि
षयत्वात् पवेदोषः॥ अनुमितिमात्रोक्तौ च विशेषविशेष्यकमेयत्वादिनानुमितिविषयत्वेन द्रागभेदविवक्षणेपि गुणादिरूपत्वालिंगकानुमितिविषयत्वे
न सजातीयत्वविपक्षणेपि प्रमेयत्वादिनाप्या [illegible] आत्ममादाय दोषवारणाय समुदितमुपात्तं अनुमितिविषयत्वाभावप्रत्ययमुक्ष्यापि
शेषत्वाभावनिवेशोत्तनुपादेयमेव चास्याविरोधी [illegible] क्तत्वदलं ५ (परमाणवः परस्परव्यावृत्तधर्मवंतः संयुक्तविभागाश्रयत्वे प्रत्येकं हेतुः ६

स्तत्तापानित्यसाधारणेपि पक्षि तिवैतरः॥ स्वत एवेति॥ स्वतो व्यावृत्तत्वं च स्वभिन्नलिंगजन्यस्वविशेष्यकस्वजातीयभे
दानुमित्यविषयत्वं साजात्यं च पदार्थविभाजकोपाधिरूपेणातेन घटादेस्तादात्म्येन व्यावृत्तत्वेपि विशेषस्य गुणादि
भ्यस्तेनेतरभेदानुमितिविषयत्वेपि च द्रव्यादेरपि प्रमेयत्वादिना विशेषसजातीयत्वेपि च न क्षतिरिति नित्यद्रव्यवृत्तिरिति वि
शेषणेनाप्यानवकाश्यं न तुल्यलक्षणापत्तिश्चिद्धेः प्रयोजनाभावात्॥ तत्र॥ विशेषव्यावृत्तौ॥ नन्वेतत्त्वसत्त्वेनैत्वाद
योव्यावर्तकाभविष्यंति किं विशेषेणेति चेन्न॥ अव्यावर्त्तधर्मस्याव्यावृत्तत्वाभावात्॥ तत्र व्यावृत्तेकां तत्स्वस
यामनवस्थानात्॥ ननु विशेषेष्वपि विशेषप्रसंगादिति चेन्न॥ तस्य धर्मिग्राहकमानेन स्वतोव्यावृत्तत्वेन सिद्धेः॥ एवं च
नित्यद्रव्येषु विशेषाः सिद्धाः तत्तद्गुणास्तत्तद्विशेषवंतः॥ आश्रयरूपेण विशेषेण विशेषणावंतः व्यावृत्तत्वात्॥
आश्रयस्य च विशेषवत्तया व्यावृत्तत्वेन विशेषवत्त्वसंभवादिति भावः॥ स्पष्टाकाशयो नित्यस्तानशब्दाभ्यांव्या
वृत्तेः संभवान्न तत्र विशेषकल्पनमाहुः॥ नवीनास्तु विशेषे प्रतीतिरेवमानाभावेः॥ पृथ्वीशेषाणां स्वहीतधर्मेविनाव्या
वृत्तत्वेन तथा नित्यद्रव्याणामपीत्याहुः॥ घटादीनां कर्पालादौ द्वयणुकपर्यंतं समवायेन तेषु जातेषु स्वसंबंधः इति म
त्वा तत्र घटपदं कपालपदे अवयवावयवपरे द्रष्टव्ये॥ अवयवाभावे च विना रितिजातस्वेतित्वकारणेनित्यद

वि ३

वृ. कृ. ५१

नातिव्याप्तिः॥ ननु समवायस्य संबंधत्वे किं मानमित्याशंक्याह तत्र प्रमाणं चेति॥ गुणक्रियादीत्यादीना जातिपरिग्रहः॥ संयोगादीति।
द्रव्ययोरेव संयोगः इति नियमादिति भावः॥ चैत्रसमवायसंबंधेन २

मु.टी.
२२

वयवविशेषसंबंधः समवायो न तु इत्याह नित्यद्रव्यविशेषयोरिति समवायस्य लक्षणमाह॥ नित्यसंबंधत्वमिति॥ संबंध
स्य चात्र संबंधिभिन्नत्वे सति येन नित्याभावादिस्वरूपसंबंधेन घटत्वादिविशिष्टप्रतीतिस्तेन संबंधेन तत्त्वेन तेन हेतुत्वा
त्कार्यतावच्छेदकसंबंधत्वं च यथा समवायसिद्धिः॥ न च समवायस्थाने स्वरूपसंबंधेनैव कार्यकारणभावः क
ल्पनीय इति वाच्यं॥ तथासति यत्र समवेतकार्यं संभवति तत्रादिसमवायिकारणाभावस्यावृत्त्यानस्यात्॥ न च यस
दंडकार्यमुत्पद्यते तत्र समवायिकारणमित्येवास्त्विति वाच्यं॥ कपालसंबद्धे घटध्वंसे संप्रतिक यावत्पूर्वसमवायिका
रणात्वप्रसंगादित्यपि द्रष्टव्यं॥ सिद्धसाधनमिति॥ अयुतसिद्धयोः स्वरूपसंबंधरूपत्व वदतः परस्येति शेषः॥ अ
पीतरवत्ति॥ समवायसाधनेन प्रवृत्तानां नैयायिकानामिति शेषः॥ ननु तथापि समवायस्यैकत्वे किं मानम
तत्राह॥ लाघवादिति॥ तथा च पयोगे सामान्ये लक्षणे लाघवादेकत्वसिद्धिरिति तथा समवायोऽपि ...॥ रू
पवत्ताबुद्धिरिति॥ रूपवत्ताबुद्धेः प्रमात्वप्रसंगइत्यर्थः॥ स्पर्शसमवायरूपसमवाययोरैक्यादिति भावः॥ तत्र॥ वायौ
रूपाभावादिति॥ न च रूपसमवायसत्त्वेन तेन संबंधेन तत्र कथं रूपाभावः संबंधस्य प्रतियोगिनः संबंधिस
त्त्वव्याप्यत्वादिति वाच्यं॥ रूपनिरूपितत्वविशिष्टसमवायस्यैव रूपसंबंधत्वात् तस्य वायौ तदभावात्॥ ननु विशिष्ट

प्रीमांसकदर्शनेन

एम०
२२

स्यानतिरिक्ततया विशिष्टसमवायोऽपि वायावस्तीति वाच्यं॥ रूपनिरूपितत्वविशिष्टसमवाय[illegible]निरूपि
ताधिकरणताया स्वरूपसंबंधत्वात्तस्य वायावभावात्॥ पृथिव्यां गंधसमवायो न जले इत्यादिप्रतीतेः समवाय
स्य नानात्वमिति नव्याः॥ संबंधांतर॥ अतिरिक्तपदार्थेति शेषः॥ सिद्धेरिति तस्य भूतलादावृत्त्यादि॥ प
दिवैशिष्ट्यमिति॥ ननु गुणे किं तत्तदात्मविशिष्टं नित्यं वेति विकल्प्य घ दूषणमाह॥ तस्येति॥ ननु वैशिष्ट्यस्य
तत्र सत्त्वेऽपि घटानयनदशायां तत्र घटभावाप्तावादेव न घटाभावबुद्धिरित आह॥ घटाभावस्येति॥ तत्र॥ घ
टवति भूतले॥ तस्येति॥ घटाभावस्येत्यर्थः॥ अन्यथा॥ घटाभावस्यानित्यत्वे॥ देशांतरेऽपि॥ घटस्य यद्देशापी
त्यर्थः॥ घटत्वावच्छिन्नाभावस्यैकत्वादिति भावः॥ वैशिष्ट्यस्येति॥ वैशिष्ट्यस्य नित्यत्वोपगमे पूर्वरीत्यादि
॥ तत्र॥ घटानयनेन घटवति॥ न च घटवति न घटाभावबुद्धिर्घटवत्त्वज्ञानस्य प्रतिबंधकस्य सत्त्वादिति वा
च्यं॥ घटवत्त्वज्ञानविरहदशायां घटाभावबुद्धेर्जायमानायाः प्रमात्वप्रसंगादित्यनुतात्पर्यात्॥ ननु सिद्धा
जिनोऽपि मते पाकेन रक्ते घटे श्यामवत्ताधीप्रसंग इत्यत आह॥ मन्मतेत्विति॥ द्वितीयदूषणमाह॥ वैशिष्ट्यमि
ति॥ ननु वैशिष्ट्यानंगीकारे घटाभावभूतलयोः कः संबंधः स्वरूपमिति चेत्तथा सति घटस्य न्यूतादेशीया

नि॰

अत्र न पर्याप्तिः प्रतियोगितावच्छेदकतावच्छेदकः संबंधः ८

मु.दी.
२३

भिवघटत्वत्वादृशायामपि भूतले घटाभाववद्बुद्धित्वमतेऽपि स्यात् ॥ घटाभाववद्भूतलयोस्तत्स्वरूपसंबंधस्य च तत्र सत्त्वा
दत आह ॥ एवं चेति ॥ तत्तत्कालीनमिति ॥ घटाभाववद्भूतलमिति ज्ञानकालीनमित्यर्थः ॥ तत्तद्भूतलादिकमिति
॥ यत्र भूतले घटाभाववद्बुद्धिस्तद्भूतलादिकमित्यर्थः ॥ तत्तदभावानामिति ॥ यस्य यस्याभावस्य बुद्धिस्तस्येत्यर्थः ॥ तथा
च न स्वरूपमात्रं संबंधः किं त्वीदृशस्वरूपविशेष इति न पूर्वोक्तातिप्रसंग इति भावः ॥ नव्यास्तु वैशिष्ट्यं पदार्थान्त
रमेव ॥ भूतलं घटाभाववदिति प्रतीत्या तत्स्वरूपसंबंधास्वीकारे मेवाभावाधिकरणाहस्य स्वरूपभेदतो वृत्तमात्रविषयकत्वा
न्नित्यकमादाय विनिगमनाविरह इत्याहुः ॥ इत्यादिघटकोऽन्योन्याभाव इति ॥ इह च द्रव्यत्वादिना प्रतियोगिता
वच्छेदकं अननुगमात् ॥ किं तु तद्व्यक्तित्वेन संसर्गेण प्रतियोगिताकभेदस्य छित्त्वमिवेति ध्येयं ॥ वस्तुतोऽभावत्वमेवत
या बोध्यं ॥ अत्र केचित् ॥ अभावभिन्नत्वस्याभावस्याभावत्वरूपविशेषणात्तान्यस्य कालघटना सत्तीति प्रतीत्यनाप
त्तेः ॥ एवमन्योन्याभावत्वस्याभावत्वगर्भस्याग्रे वक्तव्यतया भावत्वस्यान्योन्याभावत्वगर्भत्वे अन्योन्याश्रया
पत्तिः ॥ एवमभावत्वस्याभावभिन्नत्वरूपत्वे आत्माश्रय इति वाक्याच्छेदे वाधानुपपत्तिश्च ॥ उद्देश्यतावच्छेदकवि
धेययोरैक्यादिति ॥ तस्मादखंडोपाधिरन्योन्यता विशेषावाभावत्वमिति वदंति ॥ तत्र नव्याः अभावत्वस्या

मुभावादि० ६

वोनभा
एम०
२३

अत्रान्योन्याभावपदस्य तादात्म्यार्थकत्वाभावात् अभावपदस्य द्वंद्वान्ते श्रूयमाणस्य प्रत्येकमन्वय इति न्यूनत्ववक्तुं किं तु संसर्गाभावश्चान्योन्याभावश्चेति
द्वंद्वः भीमादिवत्पूर्वपदस्य लोपः अभावपदस्य लोपइत्यपि प्रत्येकं संसर्गाभावेतीति एवं चानुगतसिद्धलक्षणाया संसर्गाभावबोधकत्वमिति भावः
तथा च द्वंद्वात्परं श्रूयमाणस्याभावपदस्य प्रत्येकमन्वयादेवं संसर्गाभावः परोऽन्योन्याभाव इति भावः ३

खंडोपाधित्वे प्रमाणाभावः ॥ किं तु भावभिन्नत्वं समवायसामानाधिकरण्यान्यतरसंबंधावच्छिन्नप्रतियोगिताकसत्ता
भावरूपं ॥ तच्च पूर्वानुपस्थितमपि प्रकारः ॥ एवं च घटाभावप्रतीतौ नामभावांशे भासमानत्वमप्युपपद्यते ॥ नत्ववि
षयितानवस्था ॥ सत्ताभावव्यक्तेः स्वरूपत एव प्रकारत्वोपगमात् ॥ अत एव सत्तारूपप्रतियोगिज्ञानं
विनापि पदो नास्तीति बुद्धौ सप्रकारः ॥ अभावत्वप्रकारकोपस्थितिरेव प्रतियोगिधियो हेतुत्वात् ॥ अन्यथा
इदं न सदिति प्रतीत्यनापत्तेः ॥ न च सत्ताभावरूपस्याभावत्वस्यानुपस्थितस्य प्रकारत्वे विशेषणधियो हे
तुत्वव्यभिचार इति वाच्यं ॥ विशेषणाभेदेन हेतुतायामित्यत्वेन तत्र तत्र हेतुत्वानुपगमात् अखंडोपाधित्वात्
कल्पना
पा इति प्राहुः ॥ संसर्गान्योन्याभावभेदत इति मूलादेक ॥ संसर्गेण व्याप्यान्योन्याभाव व्यक्ति प्रतीयते ॥ तच्चा
युक्तं ॥ संसर्गस्याभावत्वानंगीकारादित्यत आह ॥ संसर्गाभावेति ॥ क्रमेणोभयोरभावयोर्लक्षणमाह ॥ सं
सर्गाभावत्वमिति ॥ अन्योन्याभावेति व्याप्त्यवारणाय अन्योन्याभावभिन्नेति ॥ घटादावतिव्याप्तिवारणायाऽ
भावपदं ॥ एवमग्रेऽपि ॥ तादात्म्येति ॥ तादात्म्यत्वेन तादात्म्यावच्छिन्नत्वं प्रतियोगितायां विवक्षितं ॥ तेन संयो

घटाभाव २

लाद

मु॰टी॰
२४

गावच्छिन्नप्रतियोगिताकसंयोगात्यंताभावेनातिव्याप्तिः। प्रागभावस्य लक्षणमाह॥ विनाश्यभावत्वमिति॥ अत्र ध्वंसे
ऽतिव्याप्तिवारणाय विनाशीति॥ ननु प्रागभावसत्त्वे किं मानमिति चेत्, असत्याः पुनरुत्पादाभियात्तसिद्धिरिति ग्रंथः। च
केचित्तु जन्मतो घटादुत्पादिवद्ध्वंसोऽपि ध्वंसरीतिप्रत्यक्षवदेव न नाशोऽतिरिच्यते ननु प्रागभावः। इह इदानीं घटप्रा
गभाव इति लोकानां प्रत्ययाभावात्॥ न च तत्र घटोत्पादकतत्कपालसंयोगादीनां तत्र घटोऽसन्निकाले
ऽपि सत्त्वात् पुनरपि तत्र घटोत्पत्त्यापत्तिः। प्रागभावांगीकारे च तदभावादेव न पुनस्तदुत्पत्तिरिति वाच्यं॥ जन्य
द्रव्यत्वावच्छिन्नप्रतिजनकत्वपाककृत्यस्य समवायसंबंधावच्छिन्नप्रतियोगिताकद्रव्याभावस्य विरहेणोक्तदा
पत्त्यसंभवात्॥ न च जन्यद्रव्याभावस्य जन्यद्रव्यात्पत्तिकालीनोत्पत्तिकध्वंसाभावस्य वा हेतुत्वमित्यत्रापि नि
गमनाविरहेण तादृशद्रव्याभावस्य तादृशध्वंसाभावानां च कारणतामपेक्ष्य लाघवादेकस्यैव प्रागभावस्य हेतु
कल्पनमिति वाच्यम्। प्रागभावकल्पनेऽपि तत्तत्कालोत्पत्तिकानंतपदार्थप्रतियोगिकानामनंतानां प्रागभा
वानां विनिगमनाविरहेण हेतुतापादकत्वात्॥ तथा च प्रागभावरूपधर्मिकल्पना गौरवपरमिति चेत्
तदुत्पाद्या॥ अत्र वदंति। स्वानधिकरणक्षणतंतुषु पटोत्पत्तिवारणाय सहस्रतंतुकपटस्थले बहूनां तं

राम॰
२४

तूनां तत्संयोगानां च तत्तद्ध्वंसकत्वेन हेतुत्वकल्पनापेक्षयैकप्रागभावस्य हेतुता लघीयसी॥ अथैवमपि छिन्नत्रिचतुरु
त्तंतुकसहस्रतंतुकपटोत्पत्त्यापत्तिः॥ न च चरमसंयोगव्यक्तेस्तद्व्यक्तित्वेन हेतुत्वान्नापत्तिरिति वाच्यं॥ तथा सति
स्वानधिकरणतंतुष्वपि चरमसंयोगाभावादेव पटोत्पत्तिवारणसंभवे प्रागभावकल्पनानौचित्यादिति चेन्न॥ चरम
संयोगस्य समवायघटितसामानाधिकरण्यप्रत्यासत्त्या हेतुत्वे तंत्वंतरेऽपि समवायेन पटोत्पत्तेस्तत्र समवा
येन चरमसंयोगाभावेन व्यभिचारात्। यत्र [illegible] संबंधेन तत्तत्पटत्वावच्छिन्नप्रति चरमतंतुसंयोगव्यक्तेः
कालिकसंबंधेन हेतुता वाच्या॥ तथा च स्वानधिकरणतंतुष्वपि कालिकतया चरमसंयोगसत्त्वात्पटोत्प
त्तिवारणाय प्रागभावहेतुत्वस्यावश्यकत्वादिति। एवमप्यनुभवकानातिरिक्तः पदार्थस्तथापि तस्य संप्रतियोगि
त्वप्रमाणाभाव इति ज्ञेयं॥ ध्वंसस्य लक्षणमाह॥ जन्याभावत्वमिति॥ प्रागभावेऽतिव्याप्तिवारणाय जन्येति॥
अत्यंताभावस्य लक्षणमाह॥ नित्येति॥ ध्वंसादिवारणाय नित्यपदं॥ नन्वत्यंताभावस्य नित्यत्वे घटानयनानं
तरमपि भूतले घटो नास्तीति प्रतीत्यापत्तिरित्यत आह॥ यत्रेति॥ तत्र घटसंबंधाभावादेव घटानयनानं
तर घटात्यंताभावबुद्धिरिति भावः॥ कालविशेषविशिष्टस्वरूपस्य संसर्गतायामादेव घटे वाति घटो नास्ति

मु॰टी॰
२५

तिप्रतीत्यभावोपपत्तेश्चैतत्पर्यसंसर्गाभावे मानाभाव इत्यपूर्वसंकेचि[illegible]दित्यनेन समर्थितः॥ ननु श्यामघटकाले घटात्यंता
भाववृद्धिः स्यादत्यंताभावस्य नित्यत्वादिति शंकते नैतदित्याशंक्याह॥ अन्यथेति॥ ननु तर्हि रक्तरूपप्रागभावाधिकरणे श्यामघटस्या
पि रूपध्वंसाधिकरणे च रक्तघटे कपरक्तो नास्ति श्यामो नास्तीति प्रतीतिः ध्वंसप्रागभावयोरधिकरणेऽत्यंताभावस्या
सत्वादित्यत आह श्यामघट इति॥ तत्रैवेति ध्वंसप्रागभावयोरित्यर्थः॥ अत्यंताभावेन सहेत्यर्थः॥ न त्वेवं
व्यसतेऽप्येवं पक्षे कथितशंकया मिथ्यापत्तिरेवेति भावः॥ युक्तं चैतत् कथमन्यथाप्येवमत्रापि रक्तमध्ये श्यामघट
रक्तं रूपं नास्तीत्याकारकप्रत्ययप्रसक्तस्य सामान्याभावावगाहित्वात्॥ न चैवं दृश्यप्रत्यययोरक्तमध्ये लाघवमाहाप्येवोप
रक्तमध्यंस[illegible]प्रागभाववतिरक्तेऽपि तादृशाकारप्रत्ययप्रसंगादिति न च सत्त्वावच्छिन्नप्रतियोगिताकत्वेऽध्वंस
प्रागभावयोरव्याप्यवृत्तितेनांतरा श्यामरक्तरूपं नास्तीति प्रत्ययस्तदा ध्वंसप्रागभावयोः सामान्याभावेऽपि च प्रतियोगिताकत्व
स्वीकारान्न तु एवोपरक्तमध्ये ध्वंसप्रागभाववति रक्तेऽतत्त्वात्तदनभ्युपगमादिति वाच्यम् विनिगमनाविरहेण
पदार्थांतरध्वंसप्रागभावयोरपि तत्स्वीकारप्रसंगेन गौरवात्॥ तदुपेक्ष्याह अत्यंताभावेऽस्यात एव श्यामादौ
बंधकल्पने नैव लाघवादित्यन्यत्र विस्तरः॥ नन्वभावसिद्धौ धेत्यादि विभागानुपपन्नोऽभाव एव मानाभावादि

एम॰
२५

(गंधादिघटितस्य गंधवत्त्वादेः पृथिव्यादेः स्वाधर्म्यतया निरूपणे गंधादिज्ञानापेक्षणादिति भावः ५८
(इदं च निरूपणान्वयि ५

त्यभिप्रायेणाप्राभाकरः शंकते नेत्यन्वितात् अभावस्याधिकरणात्मकत्वे गौरवं प्रदर्श्यापि तन्मतेनेत्युक्तमत्रातिरिक्तेति॥
भावातिरिक्तेत्यर्थः॥ अभावस्याधिकरणात्मकत्वे भेदे आधाराधेयभावानुपपत्तिरूपो दोषः सोऽप्यस्मन्मतेनेन
त्याह एवं चेति॥ अधिकरणायेत्तपातिरिक्तत्वे चेत्यर्थः॥ नन्वभावाधिकरणकाभावस्याधिकरणात्मत्वे यथाधा
राधेयभावोपपत्तिस्तथा सर्वत्राप्यस्त्वित्यत आह दृष्टांतरमाह एवं चेति॥ अन्यथा॥ अभावस्याधिकरणात्मक
त्व एव तत्तावदूषणमाह[illegible]क्षणेन परस्परधर्मतापत्त्रौ नां सत्यपदार्थानामेव परस्परभेदकत्वं न्यायमित्युमाह [illegible]
इदानीमिति [illegible] पदार्थनिरूपणानंतरमित्यर्थः [illegible] तदनिरूपणे तत्तत्पदार्थघ
टितस्य तत्पदार्थस्य साधर्म्यतया निरूपणासंभवादिति भावः॥ समानो धर्मः स धर्मो यस्य भावस्तत्साधर्म्यं॥ एवं वैध
र्म्यमित्यत्रापीति भ्रमवारणाय बहुव्रीहिमाह समानो धर्मो येषामिति॥ केवलान्वयित्वाद्विति विषयभेदेनाभि
धेयता भेदेऽपि ज्ञानविषयत्वेन केवलान्वयित्वमस्त्येवेति भावः॥ एवमग्रेऽपि॥ ज्ञेयत्वादित्यत्रापि पदार्थे दृश
यतिस्वमभिधेयत्वेति॥ अभिधेयत्वेति व्यापिका॥ प्रमेय+पत्वमभिधाविषयत्वं अभिधा च संकेतमाध्यो
धिकापदार्थ इति मीमांसकाः॥ संकेतभिन्नायामभिधायां मानाभावात् संकेत एवाभिधेत्याह दृकिमित्यादिना

मु.टी.
२६

स्तित्वपरिग्रहः। तच्च कालसंबंधित्वम्। द्रव्यादीनां षण्णां धर्म्माभावत्वं स्पष्टमतस्तदुपेक्ष्य द्रव्यादीनां पंचानां साधर्म्यमत्रप्रपंचि
तम्। द्रव्यादयः पंचेत्यादिना। अनेकत्वसति भावत्वमिति। एवं च मूले द्रव्यादयः पंचेति उद्देश्यपदमभावा अनेक इति विधेयपद
मिति बोध्यम्। अत एव भाष्ये पंचानामित्युक्तम् न तु पंचभावानामिति। अनेकभाववृत्तीत्यादि। अत्र च अनेक सा
वृत्तित्वं स्वप्रतियोगिवृत्तित्व सामानाधिकरण्योभयसंबंधेन भेदविशिष्टत्वे सति भाववृत्तित्वम्। तेन गुणादौ
सत्वाद्रूपस्यानेकत्वस्याभावेपि नाव्याप्तिः। भाववत्त्वरूपत्तादृशधर्म्ममादाय समवायेतिव्याप्तिवारणाय पदार्थवि
भाजकोपाधीति। उपाधिमत्ता च समवायस्वरूपसंबंधान्यतरसंबंधेन तेन कालिकसंबंधेन घटस्य तादृशोपाधि
चेंद्रियेणाभावप्रत्यक्षे जननीये योग्यानुपलब्धेः सहकारितामात्रेण निर्वाहे अतीन्द्रियप्रमाणकल्पनमनु
चितमिति भावः। तत्र योग्यानुपलब्धेरभावप्रत्यक्षहेतुत्वयुक्तिमाहातयदीति। घटादिज्ञाने घटादिभ्रमेन च
घटत्वमहेतुदोषस्य वत्तत्प्रतिबंधकः। अन्यथाभ्रमासन्निकाले तदभावप्रत्यक्षापत्तेरिति वाच्यम्। विनश्यद्व
स्थाहेत्वाधिकं भ्रमोत्पत्तिकाले प्रतिबंधकीभूतदोषाभावस्य सत्त्वादभावप्रत्यक्षापत्तेः। अभावोपलंभे तदि
द्रियजन्यत्वे तत्संबंधावच्छिन्नतदभावलौकिकप्रति[illegible]युपलंभावात इंद्रियजन्यो नाहायत्तत्संसर्गकात्म

भ्रमस्त्व२

श्री प्रतियो२

या१
६९

कारकोपलंभाभाववत्त्वार्थः। इंद्रियांतरजन्ये आनुमानिके च तदुपलंभे सत्यपि तदभाववत्प्रत्यक्षात्तदिंद्रियजन्येति। अभावप्रत्यक्षहेतुप्रतियोग्यारोपसत्त्वप्रभावप्रत्यक्षासादनाद्यापितितत्वप्रतियोग्युपलंभाभावे। अयोग्येति। तेन जलपरमाणावादौ पृथिवीत्वाभावादेः प्रत्यक्षमिति भावः। महत्त्वानुसारेण योग्यत्वं निर्वक्तिमाचेति। प्रयोजितत्वं आपादितः सन्नुपलंभाभावोऽभाववत्प्रत्यक्षे हेतुरिति। अत्र तदधिकरणविषयकोऽभावप्रत्यक्षे तदधिकरणकत्वं आपादककापत्तियोग्यत्तदुपलंभस्य विषयतासंबंधावच्छिन्नप्रतियोगिताकाभावो हेतुरित्यर्थः। उपलंभे तदधिकरणकतदापादककापत्तियोग्यत्वं च तत्प्रतियोगिमत्त्वनिष्ठव्याप्तिनिरूपकत्वं। अत्र च तदापादककापत्तियोग्यत्वं तत्र तदभाववत्प्रत्यक्षानुपपत्तिरिति योग्यत्वनिवेशः। न च प्रतियोगिमत्त्वस्योपलंभव्याप्यत्वेन विशेषितस्यायलंभसामग्र्यंतरविरहेऽप्रतियोगिमत्त्वस्योपलंभाभावात् किंतु महत्त्वोद्भूतरूपाद्यवच्छिन्नस्यैव एवं च महत्त्वादिविशिष्टपृथिवीत्वस्योपलंभव्याप्यत्वात् जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षापत्तिरिति वाच्यं तदधिकरणवृत्तिधर्मावच्छिन्नत्वस्य योग्यताघटकीभूतव्याप्तिशरीरे निवेशात्। महत्त्वस्य जलपरमाणुवृत्तित्वेन ताहृशव्याप्तौ ताहृशधर्मानवच्छिन्नत्वाभावात्। नच गंधवद्भिन्नत्वविशिष्टस्यापि पृथिवीत्वस्य

तदुपलंभव्याप्यत्वात् गंधवद्भिन्नत्वस्य जलपरमाणुवृत्तित्वात् तत्र दोषतादवस्थ्यमिति वाच्यं योग्यताघटकव्याप्तौ प्रतियोगिताहकातिरिक्तधर्मानवच्छिन्नत्वस्यापि निवेशात्। गंधवद्भिन्नत्वादेः प्रतियोगिग्राहकातिरिक्तत्वेन ताहृशधर्मानवच्छिन्नत्वस्योक्तव्याप्त्यभावात्। न च प्रतियोगिग्राहकत्वं प्रतियोगिग्रहजनकत्वं तच्च गंधवद्भिन्नत्वपृथिवीत्वोभयसमूहालंबनात्मकलौकिकप्रत्यक्षविषयविधया हेतुत्वात् गंधवद्भिन्नत्वस्याप्यस्तीति वाच्यं प्रतियोगिप्रकारतानिरूपितलौकिकविशेष्यताविरहप्रयोजकीभूताभावप्रतियोगित्वस्यैव प्रतियोगिग्राहकत्वपदार्थत्वात्। अयं विशेषणत्वप्रकारतानिरूपितलौकिकविशेष्यत्वाप्रसिध्यत्तद्घटितनिरुक्तयोग्यानुपलंभविरहात्तदभावप्रत्यक्षं तत्र स्यादिति चेन्न। नहि वयं सर्वत्राभावप्रत्यक्षे निरुक्तयोग्यानुपलंभस्य हेतुत्वं ब्रूमः किंतु योग्यस्याभावप्रत्यक्षे योग्यविशेषणत्वाद्यभाववत्तदधिकरणप्रत्यक्षे तु तदधिकरणीयत्वप्रसज्जनप्रसंजितप्रतियोगिकत्वं तदधिकरणीयत्वोपलंभस्य विषयतासंबंधावच्छिन्नाभाव एव प्रतियोगिनिष्ठाहेतुः। अत्रापाद्यापादनस्य सर्वत्रासंभवेन तदधिकरणीयत्वप्रसंजनप्रसंजीत च तदधिकरणीयत्वनिष्ठव्याप्तिनिरूपितत्वं जातित्वादिविशिष्टस्य तत्संभवेऽपि तत्त्वस्योपल

(बहुव्रीहिः =

मु॰टी॰
७०

भव्याप्यत्वात् स्तंभे पिशाचत्वाभावप्रत्यक्षं जातित्वविशिष्टस्य पिशाचवृत्तित्वस्योपलंभाव्याप्यत्वान्न पिशाचे स्तंभत्वा
भावप्रत्यक्षस्य संभवादात्मत्वेन स्तंभवृत्तित्वपिशाचवृत्तित्वयोरुपलंभव्याप्यत्वाव्याप्यत्वाभ्यां स्तंभपिशाचयोः पि
शाचभेदस्तंभभेदयोः प्रत्यक्षत्वाप्रत्यक्षत्वे उपपादनीये इति। न चाक्षुषं प्रत्यक्षमिति। अनुपलंभे विद्यमाने
पि निरुक्तयोग्यता। विशिष्टस्य तस्य तत्राभावादिति भावः। आत्मादिपिशाचत्वादिति। तथा च समानेन्द्रियजन्यो
पलंभव्याप्यत्वस्य योग्यताघटकत्वान्न तत्र चाक्षुषमिति भावः। ननु जातित्वादिविशिष्टस्य तेजोवृत्तित्वस्यो
पलंभव्याप्यत्वात्तेजसि गुरुत्वाभावप्रत्यक्षापत्तिरेवं स्तंभे पिशाचत्वाभावप्रसक्तवत् पिशाचाभावस्यापि प्र
त्यक्षापत्तिरत आह गुरुत्वादिकमिति। आदिपदेन पिशाचादिपरिग्रहः। अयोग्यस्य पिशाचत्वादिजातेरभा
वस्य प्रत्यक्षत्वाद्गुरुत्वादिकमित्युक्तं न योग्यः। न प्रत्यक्षविषयः अशक्यत्वादिति। निरुक्तयोग्यताघटकस्या
पि प्रतियोग्यवृत्तिधर्मानवच्छिन्नत्वस्यापि विशेषणत्वमुक्तं ते च जातित्वविशिष्टतेजोवृत्तित्वस्योपलंभव्याप्यत्वे
पि जातित्वस्य गुरुत्वावृत्तित्वेन तादृशव्याप्यत्वे प्रतियोग्यवृत्तिधर्मानवच्छिन्नत्वाभावादिति भावः। न च तद
धिकरणीयत्वप्रसंजनप्रसंजितप्रतियोगिकत्वे तदधिकरणीयत्वोपलंभस्याभाव एवेन्द्रियकघटाभावा

एम॰
७०

दिप्रत्यक्षे हेतुरास्तां किं स्वोक्तयोग्यानुपलंभहेतुतयेति वाच्यं। तथा सति परमाण्वादौ महत्त्वाद्यभावप्रत्यक्षानुपप
त्तेरिति। वायावुद्भूतरूपाभावेति। रूपत्वावच्छिन्नाभावस्यातीन्द्रियावद्भूतरूपप्रतियोगिकत्वेन प्रत्यक्षासंभवादुद्भू
तेति। एवमादयेत्यादिना प्रभायामुद्भूतस्पर्शाभावपरिग्रहः। प्रत्यक्षविषयत्वेन कारणत्वस्योक्तत्वान्नेवृत्ति
रूपत्वाघटितेन्द्रियाभावप्रत्यक्षत्वाङ्गीकारे तदनुरोधेन तदधिकरणीयत्वस्यादिदृष्टौ योग्यताउपलंभस्य हेतुतानुक्तौ
कार्ये स्वाभिप्रायवान् संसर्गाभावयोग्यतामाह संसर्गेति। प्रतियोगिनो योग्यतेति योग्यमात्रप्रतियोगिकत्वस
तियोग्यधर्ममात्रावच्छिन्नप्रतियोगितांकमित्यर्थः। अत्र द्रव्यसामान्याभाववारणाय मात्रेति रूपत्ववद्घटा
संतताभाववारणाय विशेष्यदलं रूपगुरुत्वान्यतरावच्छिन्नाभाववारणाय विशेष्यदलं मात्रेति। अधिकरण
योग्यत्वमिति योग्याधिकरणवृत्तित्वमित्यर्थः। इदं चाभावग्राहकयोग्यसन्निकर्षपरं तेनार्थे न स्तंभादौ वा
घादौ न पिशाचान्योन्याभावप्रत्यक्षमिति भावः। अन्योन्याभावयोग्यतातु जात्यवच्छिन्नप्रतियोगिताकत्व
जात्यतिरिक्तयोग्यधर्मावच्छिन्नप्रतियोगिताकत्वामतरदेवं तत्त्वं न स्तंभे पिशाचान्योन्याभावपिशाचवद
न्योन्याभावयोः प्रसक्तत्वापत्त्यक्षत्वोपपत्तिरित्यत्र विस्तरः धर्मत्वादिसामान्यलक्षणायां द्रियजन्य

मु॰ २

मु.टी.
७१

त्वाभावाद्व्यापारत्वकथनमसंगतमत आह व्यापारः सन्निकर्ष इति। पक्षेपि सत्त्वादेरिंद्रियप्रतियोगिकत्वाभावात्स
न्निकर्षत्वमयुक्तं। तथापि संयोगस्येंद्रियप्रतियोगिकत्वात्तद्वृत्तिस्येंद्रियसंयुक्तविशेष्यकज्ञानप्रकारीभूतधूम
त्वादेः प्रत्यासत्तित्वान्निर्वाहः। तच्च सामान्यस्वरूपं चक्षुरुपदीति। इंद्रियसंबद्धं सामान्यं प्रत्यासत्तिरित्युच्यते। तेन देत्य
थानवयत्र चक्षुःसंनिकर्षो धूमस्तित्तानं जनितं तत्र चक्षुःसंयोगाविरामेपि तादृशज्ञानमादायेंद्रियसं
बद्धविशेष्यकज्ञानप्रकारस्य धूमत्वादेर्धूमांतरे सत्त्वात् धूमांतराणां सामान्यलक्षणया ज्ञानापत्तिः। न चैतत्त
धूमेनेंद्रियसंबद्धं ज्ञानं लक्षणात्मकसंनिकर्षस्य धूमस्येत्युक्तत्वात् न च तत्रैकक्षणे सामान्यलक्षणाजन्यत्वापत्ता
नस्वीकारस्त्वतिविरहदंतिवाच्यं। तन्मूलकज्ञानधारायां तदेवारत्वादित्यत आह। लौकिकसंनिकर्षस्य
विशेषणविधया घटकत्वं वाच्यं। अन्यथा तत्र धूमे पूर्वकालीनचक्षुःसंयोगमादाय तद्दोषतादवस्थ्य
मितिध्येयाऽऽदमपलक्षणाय चक्षुःसंयोगे विद्यमानेपि दोषानवकाश इत्याहुः॥ किं तु धूमत्वप्रकारकस्म
रणं तत्र धूमत्वसामान्यलक्षणाजन्यज्ञानापत्तिवारणाय सामान्यलक्षणाघटकज्ञाने तदिंद्रियजन्यत्व
स्य वाच्यत्वात्। न चेंद्रियसंबद्धस्य तत्र लौकिकसंबंधः ज्ञाने प्रकारीत्यत्र ज्ञानस्येंद्रियजन्यत्वं चैव विवक्षितं

मु०
७१

कोऽत्राह इति। अत्र लौकिक ५

तद्ग्रहणे तेन पुंक्तिं चिद्रूपपुष्पितावरणात्त सामान्यलक्षणायाः सकलारणुगोचरो मानसबोधो न स्यात्त दत्तो मनसो
लौकिकसंबंधस्य ज्ञाने मनोजन्यत्वस्य चाभावादत आह इदं चेति। तथा च बहिरिंद्रियसामान्यलक्षणाया ज्ञाने
जननीये तद्विवक्षितं न तु मानससामान्यलक्षणाजन्यज्ञाने इति नोक्तदोष इति भावः।
दिमत्त्वमवृत्तापि तु भूमिकामाचरयतीपरे इत्युत्पादिना भूतवेदत्वस्य ... आसत्तिराश्रयाणां त्वित्या
त्यादिना संयोगेनेतद्दृष्टिकसाध्यव्याप्तेः परिग्रहः। तत्रेदं बोध्यमिति ज्ञातस्य तेनान्वयः भूतलादौ नाद
सन्निरीति बोध्यमित्यर्थः। परंपरया प्रत्यासन्नस्य घटत्वादेरेव प्रत्यासत्तित्वमानमनित्यसामान्यं तत्र प्रत्या
दोषासंगते राह परे इति। तथा च घटत्वस्य परंपरया कपालादावृत्तेर्नाड्रूपमासादोषसंगतिः। किं त्वित्यादिना वस्तुमाण
तित्रुम्पया समवायेन ज्ञानप्रकारीभूतघटत्वादिसामान्यं प्रत्यासत्तिः कोऽपीत्यादि ज्ञानापत्तेरिति भावः। तेन संबंधेन
तिएव चेत्पूर्वः किं चेति कृतानजन्यतदतिरस्माद्यातः। सामान्यलक्षणाघटकीभूतलौकिकसन्निकर्षस्य वि
शेषणत्वविवक्षणेन कार्यान्तरीयसंयोगमादायोक्तातिप्रसंगस्याभावादिति। तन्मात्र वोक्तदोष एवात्र
कल्प्ये बोध्यं न च तत्रैत्समवायेन वा यादिसंबंधेन घटत्वादेरेवासत्तित्तयापवोक्तदोषापि न संभवती

मु॰टी॰
७२

४ स्या वश्यकतया गौरवं ज्ञानस्य प्रत्यासत्तित्वे तु पुरुषनिष्ठ प्रत्यासत्याहि तुत्वान्नत तु रूपीयत्वनिवेशः ४

तिवाच्यं। अस्त्वसमवायिसमवायादिना घटत्वं कपालादौ प्रदानत्वात्ते किंतु तद्वृत्ति एव समवायादिनात्मा तत्तदुत्तर
मपि तद्वृत्त्याश्रयकपालादीनां ज्ञानस्य सर्वात्मवृत्तिद्रव्यघटत्वप्रत्यासत्त्या उपपादनासंभवात् एवं ज्ञायमानसा
मान्यस्य प्रत्यासत्तित्वे चैत्रीयज्ञानविषयसामान्यप्रत्यासत्त्या मैत्रस्य तदाश्रयप्रत्यक्षापत्तिभियात्तत्पुरुषीयत्व
निवेशे इति लाघवमित्यपि बोध्यं। तेन सामान्यविषयकं ज्ञानमिति इंद्रियसंबद्धविशेष्यकं सामान्यप्रकारकं ज्ञा
नमित्यर्थः पद्मसामान्यविषयकज्ञानमात्रमित्यर्थः। सामान्यविषयकज्ञानत्वं प्रत्यासत्तितावच्छेदकमिति
प्रावत। तथा चात्र कल्पे इंद्रियसंबद्धविशेष्यकत्वप्रकारकत्वतदिंद्रियजन्यत्वानि ज्ञानविशेषणानि नोपा
देयानीति। एवं मते तु तदिंद्रियजन्यत्वादेर्निवेशेन इंद्रियभेदेन कार्यकारणभावकल्पनेन न च गौरवमित्य
र्थः एतन्मते च निर्विकल्पकसाधारणं स्मरणसाधारणं च सामान्यज्ञानमात्रं प्रत्यासत्तिः तथा च घटत्व
प्रकारकप्रत्यक्षत्वं कार्यतावच्छेदकं घटत्वज्ञानत्वं च कारणतावच्छेदकं स्वप्रकारीभूतघटत्वाश्रय
त्वं कार्यतावच्छेदकः संबंधः स्वविषयघटत्वाश्रयत्वं च कारणतावच्छेदकः संबंधः चक्षुःसंयोगादि
न्यकाले एवोक्तातिप्रसंगस्य वक्ष्यमाणतदिंद्रियजन्यत्वादिनैव वारणादिति ध्येयम्। अणुत्वज्ञानमात्रे

श्रू॰
एम॰
७२

३

णैव सकलाणुगोचरमानसबोधोत्पादाद्। बहिरिति आलोकसंयोगादिकमित्यादिना दोषाभावपरिग्रहः। न
जन्यत इति। अयमाशयः। यदा घटत्वचक्षुःसन्निकर्षादिघटिता चाक्षुषादिसामग्री तदुत्तरक्षणे घट इति चाक्षु
षं सैव सामान्यलक्षणा न पोत्तरक्षणे सकलघटविषयकं ज्ञानं जन्यत इति प्राचीनमतम्। तेन लौकिकविलं
बः क्लृप्यते तत्र च मानाभावः। यद्वा घट इति चाक्षुषमुत्पद्यते। तदेव सन्निकृष्टघटांशे लौकिकमन्य
घटांशे अलौकिकमित्यभ्युपगमात्। तथा च सामान्यलक्षणाजन्यघटत्वप्रकारकचाक्षुषत्वस्य व्यापकघ
टत्वप्रकारकलौकिकचाक्षुषत्वमिति फलितं। तथा च चक्षुःसन्निकर्षादिघटितकालव्यापकधर्मावच्छि
न्नजनकसामग्र्याः सहकारिणा विरहादेव न चाक्षुषसामान्यलक्षणया ज्ञानमिति तात्पर्यं दिनानुरूपयति। अत्र

बं॰

त्वायदिशब्दं सामान्यलक्षणाधिरहेऽपि ज्ञानं युक्तः। सामान्यलक्षणास्वीकारे बीजमाह अत्रेति। अयम
र्थः अयमभिप्रायः अभानविषयता न संभवतीति प्रत्यक्षविषयतायाः सन्निकर्षाश्रयत्वव्याप्यत्वादिति भा
वः वह्निसंबंधसंग्रहो न त्वादिति तथा च प्रत्यक्षे व्याप्तिनिर्णीतत्वान्नतद्विशेष्यकोपि व्याप्यत्व
संशयः संभवतीति भावः। अन्नुपस्थितत्वादिति। तथा च धर्मिज्ञानाभावान्न तद्विशेष्यकोऽपि व्याप्यत्वसं

शयः संभवतीतिभावः ॥ ज्ञानञ्चक्षुर्णा ॥ स्वीकारेवीजमाह ॥ एवमित्यादिनोक्तं यद्यपि दिति ॥ चंदनखंडस्य चाक्षुषे ज्ञायमा
नेन उपस्थितसौरभभानेन स्यात्सौरभांशे चक्षुःसन्निकर्षाभावादित्यर्थः ॥ सौरभत्वप्रकारकलौकिकप्रत्यक्षसा
मग्र्याः सहकारिणाविरहेणासौरभत्वसामान्यलक्षणायापि सौरभभानं न संभवतीतिभावः ॥ सुरभिचंदनमि
त्यादौ सौरभादेर्भाने सौरभत्वादिसामान्यलक्षणायैव संभवतीति सौरभत्वप्रकारकलौकिकप्रत्यक्षे सौरभत्वा
वच्छिन्नप्रकारकप्रत्यक्षान्यतरसामग्रीसहकारिणो वृत्तस्याः फलजनकत्वांगीकारात् प्रकृते च तत्सा
मग्र्याः सहकारिणाः सत्त्वादित्यभिप्रायेणाह यद्यपीति सौरभांशस्यभानमिति ॥ स्वरूपतः सौरभत्वस्य भानमि
त्यर्थः ॥ ज्ञानलक्षणायाज्ञानलक्षणायैवा ॥ तदानीं सौरभत्वांशे ग्रहेपि सौरभत्वसामान्यलक्षणायैव सौरभत्वा
देर्भानमस्तु सौरभत्वप्रकारकसौरभविशेष्यकत्वस्यैव तत्कार्यतावच्छेदकत्वादिति चेन्नासौरभत्वादिवि
षयताप्रयोजिकायाः स्वविषयसौरभत्वादिमत्त्वरूपसामान्यलक्षणायाः संबंधस्य सौरभत्वेऽभावेन सामान्य
लक्षणापात्तस्यानानिर्वाहात् सौरभत्वसामान्यलक्षणायाः कार्यतावच्छेदके सौरभत्वप्रकारकत्वनि
वेशप्रयोजनाभावाच्चानचत्तानलक्षणायाः कारणत्वांतरकल्पने गौरवभिये च सामान्यप्रकार

५ धर्मान्तरस्याग्रहीतत्वयासामान्यलक्षणयालद्भानानिर्वाहादितिभावः ॥ न ३ धर्मान्तरस्य सौरभत्वांशे ५

कत्वस्यकार्यतावच्छेदकेप्रवेशइतिशंकामा ॥ विशेषणज्ञानहेतुतयैव निर्वाहे ज्ञानलक्षणायाः कारणत्वांत
रकल्पनाविरहादिति ॥ नन्वेवं विशेषणज्ञानजन्यतावच्छेदकं विशिष्टवैशिष्ट्यबुद्धित्वं ज्ञानलक्षणाया तु विशिष्टप्र
त्यक्षत्वमितिनलक्षणेन निर्वाहः एवं यत्र ज्ञानलक्षणायाः स्वविषयमुख्यविशेष्यकमानसं तत्र विशेषण
ज्ञानेकारणतया न निर्वाह इत्यत आह एवमिति ॥ ज्ञानलक्षणाया ॥ ज्ञानलक्षणायैवात एव सत्त्वज्ञानरूप
सामान्यलक्षणायाः स्वविषयधर्मत्वाश्रयत्वसंबंधेन धूलीपटलेऽभावेन सामान्यलक्षणया तु व्यवसा
ये धूलीपटलभानासंभवादितिभावः ॥ सत्वदेवेति ॥ ध्यानाद्यभावेपीत्यर्थः ॥ इति प्रत्यक्षखंडे मुक्तावलीप्रका
शः समाप्तः ॥ छ ॥ शुभमस्तु ॥

॥छ॥ इति दिनचर्या[illegible]खंडं समाप्तं ॥छ॥

अनुमितिर्मितिः। संगतिश्चात्र प्रत्यक्षेणोपजीव्योपजीवकभावो बोध्यः। करणे निर्दिष्टे एव व्यापारे जि
ज्ञासोदयात्तेन पश्चात्त्रितयमपि करणं प्रपंचयति। व्याप्तिज्ञानमिति। परामर्शो व्यापार इति। न
नु व्यापारत्वं तज्जन्यत्वे सति तज्जन्यजनकत्वं तच्च परामर्शे न संभवति। वह्निव्याप्यधूमवानिति पर
मर्शे व्याप्तिज्ञानजन्यत्वस्याभावात् महानसीयवह्निधूमव्याप्तिज्ञानस्य तद्दानीमभावेन व्यभिचा
रात्तत्कथमुपपादयति। तथा हीत्यादिना। पश्यतीति। धूमदर्शनानुस्मृतव्याप्तिस्मरणोद्बोधकविष
याहेतोः संपत्स्यर्थे। पाहशब्दविशेषणाद्विशिष्टस्य धूमस्य व्याप्तिसंबंधितया ज्ञातानंतरं तादृशधूमदर्शे
नस्यैव व्याप्तिस्मृतावुद्बो[धकत्व]मित्यभिप्रायेणानवच्छिन्नत्वमुक्तं एवं रूपं स्मरणमिति। उद्बु
द्धसंस्कारस्यैवं सत्त्वा[द]भावः। स एव परामर्श इति। तथा च स्मरणात्मकव्याप्तिज्ञानस्यैवं
सत्त्वान्न व्यभिचार इति भावः। न तत्रापि पदव्याप्तिघटकपदार्थानां विस्मरणेऽनुपस्थितिमत्त्वेऽविशे
षविशेषणमितिरीत्या परामर्शस्तत्र विशिष्टव्याप्तिज्ञानस्य व्यभिचारो दुरुद्धर एवेति वाच्यं।
व्याप्तिप्रतिसंधानस्यापत्तावि वक्ष्यमाणयुक्त्या लाघवेन विशिष्टस्य वैशिष्ट्यमितिरीत्या परामर्शस्यैवानु

मु॰टी॰
पत्र
७५

मितिहेतुत्वादित्यभिप्रायात्। स्मरणात्मकपरामर्शे व्याप्तिज्ञानस्य व्यभिचारेऽप्यपि न संस्कारसंबं
धेन एव व्याप्तिज्ञानसत्वात्। अत्र नव्याः। व्याप्तिज्ञानत्वस्य परामर्शत्वव्यापकतया अनुमितिं प्रति हे
तुत्वमेव नास्ति कुतः करणत्वमन्यथा कपालादेर्घटं प्रति द्रव्यत्वेन हेतुता प्रसक्ता तस्मादनुमितिं
प्रति मनस्त्वेनैव करणत्वमित्याहुः। लिङ्गमनुमितिकरणमिति। अनुमितौ परामर्शमात्रं न हे
तुरपि तु लिङ्गपरामर्शः। तथा च विशिष्टस्य कारणतायां हि विशेषणस्यापि कारणतायहात्स्मर
णरूपमार्गाल्लिङ्गपरामर्शस्य वा हेतुत्वे तस्यैव विनिगमनाविरहादुभयोर्हेतुतासिद्धैः तत्र च व्यापार
भावान्न परामर्शस्य करणता। किं तु लिङ्गस्यैवेत्याशयः। लिङ्गस्य तदानीमभावादिति। न च पर
मर्शरूपव्यापारसंबन्धेन तदानीं लिङ्गमस्त्येवेति वाच्यं। अतीतादिलिङ्गस्य परामर्शजनकत
या पूर्वमसत्त्वात् व्यापारत्वासंभवात्। तद्द्रूपलक्षणं। लिङ्गस्य हेतुत्वे च परामर्शविष
याश्रितमन्यत्रास्यानुमितिप्रसङ्गः। तत्पुरुषीयत्वनिवेशे गौरवमस्मन्मते तु समानाधिकरणप
प्रत्यासत्त्या हेतुहेतुमद्भाव एवैनातिप्रसङ्गाभावात् तत्पुरुषीयत्वानिवेशेन मितिलाघवमित्य

ति

पि वाच्यं। तच्च व्याप्यस्य पक्षेण सह वैशिष्ट्यज्ञानं दानन्तरस्य व्यभिचारादप्यतत्राह। अनुमि
मितिस्त्विति। कार्यतावच्छेदकस्य परस्परानुमितित्वाद्यत्वान्न व्यभिचार इति भावः। पक्षविशेष्यकत्व
मेव सर्वत्रानुमितौ नियतमिति नवीनमतमाह। द्विविधापीति। कारणतावच्छेदकं च परामर्श
त्वं साधारणं व्याप्यस्य पक्षे वैशिष्ट्यावगाहि निश्चयत्वमतो न व्यभिचारः। द्विविधयोरपि परामर्श
योः स्वस्वाव्यवहितोत्तरानुमितिं प्रति तत्तद्रूपेण हेतुत्वमित्यपि केचित्। वस्तुतोऽनुभवानुरोधा
त्पक्षविशेष्यकपरामर्शस्य हेतुत्वं युक्तम् एव च वह्निव्याप्यधूमवान् पर्वत इत्याकारकः पक्षवि
शेष्यक एवापूर्वः सर्वसम्मत इति ध्येयं। मीमांसक शङ्के तेन चेति। ज्ञानं विनापीत्यस्यानुमिते
रित्यनेनान्वयः। ज्ञानद्वयादेवोपज्ञानद्वयादपि विशिष्टवैशिष्ट्यावगाहिज्ञानमितिभा
वः प्रधानीभूतः। सर्वत्र सङ्केतग्रहणमिति। अनुमितित्वावच्छिन्नं प्रति न कारणतावच्छेदक
मिति यथा। आलिङ्ग्य तत्वादिति व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वस्यापि तत्र
सिद्धनियतपूर्ववर्तितावच्छेदकत्वादित्यर्थः। न च ज्ञानेऽपस्यापि विशिष्टज्ञाने कल्प

अ॰ टी॰

नीयमतोनव्यभिचारइत्यत आह। विशिष्टज्ञानेति। व्याप्यतावच्छेदकेति। अपमालोकोधूमो वेति संदेहदशायां
व्याप्यतावच्छेदकप्रकारकनिर्णयाभावेपीत्यर्थः। वह्निव्याप्यवानिति। वह्न्यभाववद्वृत्तिमानित्यर्थः॥ न
तु धूमसमानाधिकरणोत्या इति रूपव्याप्तिविशिष्टवानित्यर्थः। तत्र हेतुतावच्छेदकभानेनैपत्याः अनुमितिस
सञ्जेरिति। तथा च व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्यात्रव्यभिचारात्तेन रूपेण हेतुत्व
मिति भावः। ननु तत्र फलबलाद्व्याप्यतावच्छेदकप्रकारकज्ञानं कल्पनीयमतो न व्यभिचार इत्यत आ
ह लाघवादिति। व्याप्यतावच्छेदकप्रकारकत्वापेक्षया व्याप्तिप्रकारकत्वस्य लघुत्वादित्यर्थः। ननु हेतुता
वच्छेदकलाघवं तथापि पर्वात्तेः कल्पनालाघवं मीमांसकानां मलयुक्तिभे विष्यतीत्यत आह। किं
चेति। तत्र चगृह्यमाणेति अत्र शेषा नचायं हस्य वर्त्तमानतापि अभिधानोत्र कालान्तरीयताह शब्दहमा
दायदोषः। व्याप्तिप्रकारकं ज्ञानमिति स्वतंत्रं कारणमिति येनेनाच्यपि इत्यत्वत इति रस्येत्वतद्रूपीयत्वं
नेनिवेश्यते। चित्रस्याप्तियहकालेतद्वस्मै त्रस्यानुमित्यापत्तेरभावान्मैत्र्यात्मनि स्वत्तद्धेतु भेत्तथा
मित्तानामर्वादिति। नगौरवमिति भावः। ननु व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन पक्षधर्मताविषयक

राम॰

व्याप्तिप्रकारकज्ञानत्वेन वा हेतुतेत्यत्र विनिगमनाविरहेणाहेतुताद्वयं न वापीत्यत आह। वह्निव्याप्यइति
अनुमितिः स्पार्शवृत्त्यापनपक्षव्याप्तिप्रकारतानिरूपितहेतुप्रकारतानिरूपितपक्षविशेष्यताशालिज्ञान
त्वेन हेतुत्वस्याविवक्षितत्वाद्वत्ताहशज्ञानाञ्च वाक्षमो वह्निव्याप्यधूमवान्पर्वत इति ज्ञानादनुमित्यापत्ते
स्तत्र व्याप्तिप्रकारतानिरूपितधर्मप्रकारतापर्वतविशेष्यतानिरूपितप्रकारतानात्मकत्वादितिभा
वः। ननु ज्ञानरूपस्थलेविशिष्टज्ञानकल्पनागौरवं न्यायमतेह्यत्रापि भविष्यतीत्यत आह। इष्टं चेति। फ
लमुखगौरवस्येति। फलकार्यकारणभावग्रहः तन्मुखं तद्ध्रौव्यं गौरवं ज्ञानमित्यर्थः। विशिष्टज्ञानत्वाव
च्छेदेन कारणत्वग्रहे विशिष्टज्ञानत्वधर्मिकगौरवनिश्चयो विरोधी बाधकः ते च गौरवं प्रमाणान्तरासिद्ध
तन्नेदमित्यर्थ इति। एवं वर्तिस्वाश्रयकत्वमेवताद्दृशगौरवनिश्चयप्रागविशिष्टज्ञानत्वेन कारणत्वनि
श्चयाधीनस्य घटकोभवतात्र तत्त्वनुमित्यव्यवहितपूर्वं दाते स्वाश्रयनिरूपणविनाननुभवतीति कार्य
कारणभावनिर्णयात्स्वगौरवनिर्णयाभावान्नताद्दृशगौरवं दोषइति भावः। मेलयगामध्ये म्
नंतरं व्याप्तितिरूपणोसंगोपिपाद्घात निरूपपत्ति व्याप्यानामितित्वत्रेति। घटकात्त्वसत्यम्पर्थः॥ अ

मु.टी.
६१
७७

व्याप्तिप्रसंगादिति ॥ अव्याप्तेरभिधानमिदं येन केनचित्संबंधेन साध्यवत्त्वविवक्षणाभिप्रायेण ॥ पदिवसंबं
धसामान्येन साध्यवत्त्वविवक्षिततदा धूमवान्वह्नेरित्यादावतिव्याप्तिर्बोध्या ॥ अवहीनत्वं नास्तीति ॥ विशिष्टाधेय
तापात्र न तिरिक्तत्वादिति भावः ॥ फलितार्थमिति ॥ यावन्निष्ठाधिकरणता निरूपकतावच्छेदकसंबंध
निरूपिताधेयतावच्छेदकत्वनियमेन विशिष्टसत्तात्वस्य गुणाधेयतानवच्छेदकत्वान्नाव्याप्तिरिति भा
वः ॥ अयवत्त्वादिलक्षणमेवतारपि तु मत्वेलक्षणे दोषमाह नन्विति ॥ ननु केवलान्वयित्वज्ञानकाले पक्ष
हकिंचेति ॥ इत्यादिरित्यादिनाभसंयोगेन हेतुतायो गुणावान्घटादित्यादेः संग्रहः ॥ ननु स्वाधिकरण
हत्तिसाध्यकं देशान्याभावकावच्छिन्नप्रतियोगिताया व्याप्तिरिति चेन्न वह्निमान्धूमादित्यादौ धूमाधि
करणे वह्निमद्भेदान्याभावस्य कालिकसंबंधेन हेतोरव्याप्यापत्तेः साध्यवत्ताग्रहविरोधितानियामकस्य च
धेनाहत्तित्वस्यावश्यविवक्षणीयतया सत्ताभाववान्जात्यभावादित्यादावव्याप्तेः ॥ तत्त्यभावाधिकरणे
साध्यवत्ताग्रहविरोधितानियामकसमवायेन हेतोरप्रसिद्धेः ॥ न च समवायेन जातेरित्यादौ स्वाधिकरण

राम०
६१
७७

७८

त्यादिव्याप्तिलक्षणं कारणं सामान्याभाववान्जात्यभावादित्यादौ तु साध्यवद्भेदेत्यादिव्याप्तिलक्षणं कारणमिति
वाच्यं तथापि संयोगसंबंधावच्छिन्नघटाभाववान्साध्यविषयितया हेतोर्घटत्वस्थले ग्रहणाद्यसाध्यव्याप्तेः ॥ तत्र
विषयितया हेत्वधिकरणज्ञाने साध्यवत्ताग्रहविरोधितानियामकसंयोगेन तत्र घटाभावसंयोगेन घटाधि
करणे हेतुतावच्छेदकविषयितया च हेतोरप्रसिद्धेः ॥ ननु तिरिक्तोभयाभावमानाभावेत्यत्र आह एक
सत्त्वेपीति ॥ द्रव्यत्वलक्षणं विशिष्टाभावमादायाव्याप्तिरित्यपि बोध्यं ननु द्वैविध्यस्यासत्त्वसत्तिचूमान
वच्छिन्नप्रतियोगिताकत्वेनाभावविशेषणान्नाव्याप्तिरित्यत आह गुणवानिति ॥ अत्र हेतोरेकव्यक्ति
यासमानाधिकरणायरवव्याप्तिरित्युक्तावपि न क्षतिः स्यादिति भावः ॥ एतद्रूपवानेतद्रसादित्यत्रैतद्रूपत्वस्य गास
त्वाद्यसंभवाद्रसादाह अव्याप्तिरिति ॥ इतिघात्मभिति गुणत्वस्य द्रव्यत्वसमानाधिकरणाभावप्रतियोगिता
नवच्छेदकत्वेनाव्याप्तिरिति भावः ॥ परंपरयास्वाश्रयसमवायेन ॥ तथा चोक्तपरंपरयावच्छेदकं तद
न्यत्वस्य जातित्वसत्त्वान्नाव्याप्तिरिति भावः ॥ तादृशधर्मावच्छिन्नाभावः ॥ उक्तपरंपरयारूपत्वव्याप्य
जातित्वावच्छिन्नस्य समवायेनाभावः ॥ नास्तीत्यत्रापि पृथिव्यामित्यनुषज्यते ॥ मतांतरमाह साध्याद्वृत्ति

भावा
यद

मु.दी. ६२ १८

कइस्य दोषा स्य सत्वा दृश्य विवदं ते व्याम स्वरसः स्यात ॥ शुद्ध समाना धिकरणेति ॥ नच भिन्नविरूपिताधि

आदिना साधनपरिग्रहः। व्याप्तेर्भेदादिति। व्याप्तिज्ञानस्य कारणताभेदादित्यर्थः। पूर्वोक्तरीत्या निर्वाहे
तत्र साध्यतावच्छेदकतावच्छेदकधर्मिकप्रतियोगितावच्छेदकज्ञानानवच्छेदकत्वप्रकारकज्ञानस्य हेतुत्वे
नोचितं कारणतावच्छेदकगौरवात्। न च एवं क्वचित् जातिमान्नित्य एवानुमितिः स्याज्जातिमत्त्वानित्या
भिके ति वाच्यं। पृथिवीत्वादिहेतुकजातिमान्नित्य एवानुमित्याकारेण जातिमत्त्वानित्याका
रत्वे तावच्छेदकसंबंधत्वकथने तेन संबंधेन ... सत्ताधिकरणगुणः समवायसंबंधे तत्पात्वे तु द्रव्यत्वे साध्ये विशिष्टस
त्ताया व्यभिचारित्वात्तत्राप्यभिधानमसंगतमिति वाच्यं। साध्याभाववद्वृत्तितावच्छेदकहेतुतावच्छेदकव
त्वस्यैव व्यभिचारपदार्थत्वात्। स्वसमवायसंबंधस्य हेतुतावच्छेदकसंबंधत्वे हेतुतावच्छेदकसंबंधत्वेऽपि विशि
ष्टसत्त्वस्य हेतोर्व्यभिचारित्वाभावात्। नाव्याप्तिरिति। न च हेतुतावच्छेदकविशिष्टसत्तात्वे विशिष्टसत्ताया अ
धिकरणस्य गुणस्य सत्त्वादेवं विवक्षणेऽपि कथमव्याप्तिपरिहार इति वाच्यं। हेतुतावच्छेदकावच्छिन्ननिरू
पिताधिकरणत्वस्य विवक्षितत्वात्। विशिष्टसत्तात्वस्य गुणनिष्ठाधिकरणतानिरूपिताधेयतानवच्छे
दकत्वात्। तदवच्छिन्ननिरूपिताधिकरणत्वस्य गुणनिष्ठाधिकरणतानिरूपिताधेयतानवच्छेदकत्वात्। तद

एम० ६२ १८

वच्छिन्ननिरूपिताधिकरणत्वस्य गुणेऽभावादिति। ... नतद्वस्यैव तस्यैव ... अधिकरणभे
देनाभाव भेदानभ्युपगमादिति भावः। प्रतियोग्यधिकरणावृत्तित्व। प्रतियोग्यधिकरणवृत्तिभिन्न
त्वं विवक्षितत्वादिति। प्रतियोगिव्यधिकरणपदेन विवक्षितत्वादित्यर्थः। नन्वेवं हेतुसमानाधिकर
णस्यैवं पक्षे सत्तावान् जातेरित्यादौ सत्ताद्यभावस्य निरुक्तप्रतियोगिव्यधिकरणाभावादव्याप्ति
परिहारादत आह। स्वप्रतियोग्यनधिकरणेति। निष्कर्षेति। प्रतियोगिव्यधिकरणहेतुसमानाधि
करणाभावेन निष्कर्षे तत्पक्षे तथा च हेतुसमानाधिकरणत्वविशेषणबलादेव तादृशप्रतियोगि
वैयधिकरण्यलाभान्न वैयर्थ्यमिति भावः। सत्ताधिकरणत्वेऽपीति। तथा च विशिष्टसत्ताभावान्
प्रतियोगिव्यधिकरणः अभावो न प्रतियोगितावच्छेदकमेव विशिष्टसत्तात्वमित्यप्रतिव्याप्ति
रिति भावः। न सत्ताजातिव्याप्तिः। एवमग्रेऽपि। न तु प्रतियोगितावच्छेदकसंबंधेनैव प्रतियोग्यनधि
करणत्वमुक्तं तेऽपि ज्ञानवान् सत्त्वादित्यादावव्याप्तिप्रसंगादित्यत आह। स्वचेति। साध्यतावच्छेद
कसंबंधेन प्रतियोग्यनधिकरणत्वविवक्षणे चेत्पक्षः। वह्निविरहसत्त्वेऽपीति। तथा च प्रतियोगिता
वत्ता

वच्छेदकसमवायेनप्रतियोगिव्यधिकरणत्वात् इत्यभावप्रतियोगितावच्छेदकत्वाद्धित्वस्याप्यसिद्धिः साध्यतावच्छे
दकसंबंधावच्छिन्नत्वेनाग्रिमप्रतियोगित्वविशेषणात्तु संबंधरूपस्यैवैतेन गौरवमिति भावः। न ह्य[?]ति जीवा
ति समवायेन वह्न्यभावस्य साध्यतावच्छेदकसंयोगेन प्रतियोगिव्यधिकरणत्वाभावादित्वधिकरणे हेत्वधिकर
णवृत्तित्वाभावादिति भावः। तत्सामान्यस्य प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्य। किंचिदिति
पर्किंचिद्घटत्वप्रतियोगितावच्छेदकतदवच्छिन्नसामान्यस्यैवेत्यर्थः। पूर्वं हेत्वधिकरणवृत्तित्वविशिष्टेति एवं
हेत्वधिकरणवृत्तित्वविशिष्टस्य तस्य घटाभावादेरभावस्तदात्मकत्वपर्य्यः। घटाभावाद्यधिकरणापि
वे हेत्वधिकरणवृत्तित्वविशिष्टघटाभावादेरभावस्योत्तरहेत्वधिकरणावच्छेदेन सत्त्वादिति भावः। न च एवं हेत्वधिकरणवृ
त्तित्वविशिष्टस्य घटाभावादेरभावः स्वाभावस्य प्रतियोगी न घटाभावादेरिति वाच्यं। एवं हेत्वधिकरणवृत्ति
त्वविशिष्टस्य घटाभावादेर्योऽभावस्तदभावस्यैव हेत्वधिकरणवृत्तित्वविशिष्टघटाभावरूपस्य घटाभावा
नतिरिक्ततया विशिष्टघटाभावप्रतियोगिनस्तस्य घटाभावप्रतियोगित्वात्। न चायं प्रतियोगि
व्यधिकरणाभावप्रसिद्ध्या संभवः इति भावः। घटाभावात्मकत्वेऽपीति। अभावाधिकरणाकाभावस्याधि
स्य

करणानतिरिक्तत्वादिति भावः। इत्यादाविति। आदिना अभावसाध्यकसद्धेतुमात्रपरिग्रहः। स्वरूपसंबंधघट
ति। अभावीयविशेषणतेत्यर्थः। एवं हेत्वधिकरणवृत्तित्वविशिष्टस्वाभावेति। एवं हेत्वधिकरणवृत्तित्वविशिष्टपत्त्वघ
टाभावादितदभावात्मकत्वपर्य्यः। प्राचां मते द्रव्यसंयोगसामान्याभावानभीकारादाह कपीति। घटाभा
वीयपर्किंचित्प्रतियोगितावच्छेदकघटत्वावच्छिन्नानधिकरणत्वस्य हेत्वधिकरणे संभवात्प्रति
योगिव्यधिकरणाभावाप्रसिद्धिनिबंधनाव्याप्तिः संभवतीति भावः। घटत्वे हेत्वके यत्किंचित्प्रतियोगि
तावच्छेदकगुणसामान्याभावत्वावच्छिन्नानधिकरणत्वं हेत्वधिकरणघटादेन संभवतीत्यस्तीति कालि
घटे गुणसामान्याभावसत्त्वादत आत्मत्वपर्यंतानुधावनात्तोपविवस्यानुसारेण समाधत्ते। पाहृशे
ति। पाहृश्याः प्रतियोगिताया अवच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्ताहृश्याः प्रति
योगिताया अनाश्रयत्वमित्यर्थः। विवक्षितत्वात्। अप्रतियोगिपदेन विवक्षितत्वात्। कपिसंयोगा
भाववानात्मत्वादित्यादौ गुणसामान्याभावत्वावच्छिन्नप्रतियोगि[illegible]याऽप्रतियोगित्वाभावात्ताहृश्यप्रतियोगिता
पदेनोपादानं तु अप्रकाशितपात्तदनवच्छेदकत्वस्य कपिसंयोगाभावसत्त्वान्नाव्याप्तिरिति भावः। अत्र
तो

मु॰री॰
६४
80

अवच्छेदकत्वं विशिष्टानधिकरणत्वं हेत्वधिकरणस्य तद्धर्मभिन्नसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यस्य
त्वघोनिर्देष्टस्य सम्भवेपि पूर्व्यासन्निवेशेनैव यथाश्रुतमिति बोध्यं साध्यतावच्छेदकसंबंधेन प्रतियोग्यनधि
करणत्वविवक्षणोभ्यामतिप्रसंगकत्वे नन्वितिः महाकाल भेदविशिष्टघटाभाववत्ति च सावीयकालिक
विशेषणताघटितसामानाधिकरण्यसंबंधेन महाकालभेदविशिष्टस्य चरस्याभावइत्यपि महाकालभे
दाभावेरिति अभावीयविशेषणतासंबंधेन महाकालभेदभावादिस्यपिः सामानाधिकरण्यघटकीभूतवि
शेषणाविशेष्यसंबंधाभ्याप विशेषणाविशेष्योभयवत्त्वं तत्रैवविशिष्टाधिकरणत्वोपगमादितिभावं नतु
महाकालमात्रवृत्तिविशेषणताविशेषेणसाध्यतापामहाकालान्यत्वविशिष्टघटाभावोपि न प्रतियोगि
अधिकरणाः तत्रैतेन संबंधेन महाकालान्यत्वविशिष्टघटाधिकरणप्रसिद्धेरत आह। वस्तुतः। अत्र
प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यनधिकालोघटवान् कालपरिमाणादिस्याद् करणहेत्वधिक
रणाहत्त्वभावीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वघटितलक्षणोक्तरीत्यापि
वत्त्यासिमत्त्वदवच्छेदकसाध्यतावच्छेदकसंबंधावच्छिन्नताहशप्रतियोगितापात्रप्रसिद्धरतः प्रतियोगि

ए॰म॰
६४
80

ताधर्मिकोभयाभावपूर्येतावच्छावनं समवायेन वह्न्यभावप्रतियोगितायां वह्नित्वावच्छिन्नत्वसत्त्वात्संयो
गेनघटाभावप्रतियोगितायां साध्यतावच्छेदकसंयोगावच्छिन्नत्वस्य सत्त्वाद्वह्निमान्धूमादित्यादावव्या
मिवारणाय संबंधावच्छिन्नत्वपर्यन्तमवच्छिन्नत्वपोनिवेशः संयोगेनघटाभावप्रतियोगितायां धूमत्वा
वच्छिन्नत्वघटितोभयाभावसत्त्वादीत्यासिवारणाय सामान्यत्तत्र प्रसिद्धमिति तत्पावाव्याप्तिरिति
भावः। यस्त्विवकंबुग्रीवादिमान्नास्तीत्यादेः कंबुग्रीवादिमत्प्रतियोगिकाभावएवविषयो नतु कंबुग्रीवा
दिमत्त्वेतत्प्रतियोगितावच्छेदकत्वमपीत्युच्यते तदा यत्किंचिद्धटवत्त्यपि कंबुग्रीवादिमान्नास्तीतिवावास
प्रामाण्यापत्तिरितिहदिनिधायाह॥ सत्त्वहीपरंतीमलेपस्सत्तानिरूपणेसंगतेरप्रदर्शनात्तोप्रवक्ष्यपति।
पृष्टइतिवमितितत्त्पा चपृष्टकत्तस्य परामर्शस्य घटकत्तपापस्तधर्मत्वमपिपृष्टत्तत्तदप पादकत्वरूपा
पोद्घातसंगत्यापसत्तानिरूपणत्वभ्यासिनिरूपितात्वेककार्यकारित्वमेवसंगतिरितिबोध्यमलेपस्स
ताल्सणस्यपृष्टत्पात्तक्तःपक्षतालक्षणांस्यातंत्र्येणाद शयन्नसाध्यमाहसिसाधयिषाविरहेतियत्ता
जितेनमेमानुमितिरस्त्विलेव्याख्यापत्त्यासिवाधयिषामात्रेस्पक्षतातंनिवेशंतिसिषाधयिषामात्रेने य

सु.टी.
६५
८०

त्तिमेवानुमानोत्तरमेवानुमितेः अत एव वस्तुमात्रग्रहणादेव सिषाधयिषाविरहरूपविशेषणस्य प्रयो
जनमाह। सिद्ध्यसत्त्वामितिा अत इतीति चानुमितिनिर्वाहकपक्षतासंपत्त्यर्थमित्यर्थः॥ तत्र सिषाधयिषाया
सत्त्वामसत्त्वामपीति। सत्त्वासत्त्वोभयाभावघटितस्य सत्त्वाविशिष्टाभावमात्रघटितस्यापि विशिष्टाभावस्य स
त्त्वादिति भावः॥ सिद्धौ सत्यामसत्यां चेति। सत्यां विशेषणाभावमात्रप्रयुक्तस्य सत्त्वात् उभयाभावप्रयुक्तस्य
विशिष्टाभावस्य सत्त्वादिति भावः॥ सिद्धेः सत्त्वादिति। सिद्धेः सत्त्वे न तदभावरूपपक्षताया अभावादिति भा
वः॥ सिषाधयिषाविरहविशिष्टं च सिद्ध्यादिकं कालावच्छेदेन कालत्वेनेति तेन सिषाधयिषाकालीनसिद्धेः
कालिकसंबन्धेन सिषाधयिषाविरहविशिष्टत्वेऽपि न क्षतिः। परामर्शरूपकारणसत्त्वे सिद्धिरूपप्रतिबन्धसत्त्वे
यद्यनुमितिः स्यात्तदा तस्या उत्तेजकत्वं वाच्यं न चैतत्संभवतीत्याशङ्कते नन्वत्रेति। परामर्शेनेतरं परामर्श
शोत्पत्तिद्वितीयक्षणे ततः सिद्ध्युत्पत्तिद्वितीयक्षणे क्रमेण अव्यवधानेन एवमन्यत्रापीति। पत्र प
रामर्शसिषाधयिषासिद्धयः क्रमेणोत्पन्नाः सिद्धिसिषाधयिषापरामर्शाः एवं सिषाधयिषापरामर्शसि
द्धयस्तत्रत्यं घः सिद्धिकालपरामर्शकालं चेति सिद्धिपरामर्शोभयक्षणादूर्ध्वमित्यर्थः॥ कथमिति। किमर्थमि

एम०
६५
८०

स्यु

त्यर्थः॥ इति प्रत्यक्षमिति। अनुमितीच्छासाधनतादिविषयकमिति शेषः प्रत्यक्षोत्पत्तेः एवमनुमितीच्छासाधनता
धीस्वीकारे इच्छायामप्यापत्तिर्बाधात्मकप्रत्यक्षभवनस्यादिति। पादशस्याह शेषत्यादिच्छानुमितिर्जायतामिती
च्छासत्त्वे पर्वतो वह्निमानिति सिद्ध्यसत्त्वे पर्वतो वह्निमानित्यनुमित्युत्पत्तेः पर्वतो वह्निमानिति सिद्धिसत्त्वे
ऽपि तदिच्छावत्त्वादाह शाब्दमिति स्यापीत्यत्र तदुक्तं सिद्धिसत्त्वदशायामिदं चोत्तेजकेच्छाभ्युक्तेः परिचायकरूप
मुत्तेजकत्वं तु तत्तद्व्यक्तित्वेनैवेति वाच्यं तेन तत्तदिच्छायाम् उत्तेजकत्वेन पत्तिः किंचिज्ज्ञानानुमित्यस्य तत
दुत्तरकालीनमित्यादिः पदार्थः किंचिज्ज्ञानस्य सर्वदा सत्त्वेन तदपरोक्षाविरहात् नाद्यमिति तिता ना
नुमित्यापत्तिरित्यर्थः॥ तदिच्छायाः व्यक्तित्वेनोत्तेजकत्वानभ्युपगमादिति भावः॥ न च पत्तिः किंचिज्
ज्ञानं जायतामित्याहत्येच्छाकाले सिद्धिकालप्रत्यनुमितिर्भवत्येवेति वाच्यं अनुमितिसामग्रीसत्त्वे
आत्मादिविषयकप्रत्यक्षं किंचिज्ज्ञानसादिसामग्रीसत्त्वे नियमेन प्रत्यक्षं किंचिज्ज्ञानसामान्यतस्तैवताहश
च्छाविषयोऽपि सिद्धस्तत्रानुमित्यस्तस्यापत्ताविष्टापत्तिसंभवात् तत्त्वतस्मिन्नित्वप्रकारकेच्छाया च नानुगत
रूपेणावोत्तेजकत्वं वाच्यं तावतैव यत्किंचिज्ज्ञानं जायतामितीच्छावारणासंभवात् तत्तु तदिच्छा क्ति

त्वेनोत्तेजकत्वकल्पने गौरवादित्यत आह। वह्निव्याप्येति। प्रत्यक्षातिरिक्तं त्वानुमित्यस्य शाब्दसामग्र्यसत्त्वदशा
दिः। शाब्दसामग्रीसत्त्वे शाब्दबोधे नैवेच्छाविषयसिद्धिसंभवात् असत्त्वे वेत्यनुमितिरित्यनेन संबध्यते। तथा चा
नुमितित्वप्रकारकेच्छात्वेनोत्तेजकत्वं तत्रानुमितित्वस्यापीति भावः। तदुत्तेजकत्वप्रवेशस्य फलमाह। एव
मित्यादिना। नानुमितिरिति। तादृशेच्छायास्तत्तद्व्यक्तित्वेनोत्तेजकत्वे तु पापानादिच्छासत्त्वेऽनुत्तेजकत्वादिति भावः।
इदं तु बोध्यं। पर्वते वह्न्यनुमितिर्जायतामित्याद्यनुमितीच्छया पर्वतत्वावच्छिन्नोद्देश्यकत्वप्रकारतानिरूपि
त वह्निविधेयकत्वप्रकारताशाल्यनुमितिगोचरेच्छात्वेनानुगतरूपेणैवोत्तेजकत्वं प्रत्यक्षातिरिक्ता
नं जायतामित्याद्यनवगतेच्छानां तु तत्तद्व्यक्तित्वेन। ननु सकलेच्छानां तत्तद्व्यक्तित्वेन गौरवादिति सिषा
धयिषाकाले पर्वतो वह्निमानिति सिद्धिसत्त्वेऽपि पर्वतो वह्निमानित्यनुमित्युत्पत्तेस्तादृशसिद्धेर्न तादृशानु
मितिप्रतिबन्धकत्वं स्यादित्यत उक्तं सिषाधयिषाविरहकाले इति। विशिष्य वक्ष्यति पर्वतो वह्निमानित्याद्य
नुमितौ पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वेन प्रतिबन्धका
वत्त्वेत्यर्थः। तत्प्रयोजनमाह नेतीति। सिद्धेरेवेत्येवकारेण सामानाधिकरण्येन सिद्धिर्व्यवच्छेद्या। सामा

नाधिकरण्येनानुमितिप्रतिबंधिकेति सामानाधिकरण्यमात्रेणानुमितिं प्रतिबध्नातीत्यर्थः। अन्यथाऽवच्छेदका
वच्छेदेनानुमितेरपि सामानाधिकरण्यावगाहितया तद्व्यवच्छेद्याप्रतीतेः। सिद्धिमात्रमिति। पक्षविशेष्य
कसाध्यप्रकारकनिश्चयत्वेन विरोधित्वमित्यर्थः। उपाध्यायोक्तसिषाधयिषाविरहविशिष्टस्य सिद्धि
प्रत्यक्षसामग्र्योरन्यतरस्याभावः पक्षता तेन सिद्धिकाले समानविषयकप्रत्यक्षसामग्रीकालेऽपि चानानु
मित्युपपत्तिरित्याहुः। तद्दूषयति। प्रत्यक्षसामग्र्यभावस्य पक्षताकुक्षिप्रवेशे प्रत्यक्षसामग्रीकाले कथं ना
नुमितिरित्युत्कटशिष्यजिज्ञासानुत्पादार्थं प्रथमतः स्वसिद्धान्तमाह। इदं तु बोध्यमित्यादिना। संशयोत्तर
प्रत्यक्षं प्रति हेतुमतः साध्यविशेषदर्शनस्य सत्त्वादिति भावः। एतादृशप्रत्यक्षसामग्री विशेषदर्शनाने
धावनेन नहि दुष्टा सैवानुमितिसामग्री स्वपक्षप्रदर्शनापेक्षत्वात्तत्र प्रत्याह मितिसामग्रीप्रदर्शने प्रयो
सापेक्षेः। स्वातन्त्र्येणेति। ननु पक्षताकुक्षिप्रविष्टत्वेनेत्यर्थः। शाब्दसिद्धेरसत्त्वेऽपि शाब्दज्ञाने ज्ञापता
मितिच्छायामनुमित्युत्पादात् सिद्धावनुमितिगोचरेच्छात्वेन तथाहि प्रत्यक्षेच्छाकाले प्रत्यक्षसामग्रीका
लेऽनुमित्यनुत्पादेन सामग्र्यामनुमितित्वप्रकारकेच्छात्वेनोत्तेजकत्वस्यावश्यकत्वे तयैव रूपे

मु॰ दी॰
६७

गोत्तेजकत्वासंभवात्। एवमुभयत्र सिषाधयिषाविरहस्यैकसंबंधेन विशेषणत्वं सिद्धं। समवायघटितसामाना
धिकरण्येन वस्तुः संयोगादिरूपसामग्र्यां तु स्वाश्रयवत्त्वसंयुक्तमनःप्रतियोगिकविजातीयसंयोगघटित
सामानाधिकरण्येनैतत्प्रकरूपेण तयोः प्रतिबंधकत्वासंभवादित्याशयः। इति दिक्। ननु अनुमितिं प्रति प्रत्य
क्षसामग्र्याः भिन्नविषयेऽपि प्रत्यक्षसामग्रीकालेऽनुमित्यनुपपत्तिः। भन्नमते तु अनुमानातिरिक्तप्रतिबंधकत्वे स्वातंत्र्ये
ऽतिरिक्तप्रकृतसाध्यसाधकमीमांसकत्वेन न प्रसक्ताकुसृष्टेतस्याः प्रवेशेनोक्तापत्तेनवकाश इत्यत आह। एवमिति।
अनुमितिसामग्र्याः प्रतिबंधिकेति। तथा च भिन्नविषयकानुमितिसामग्र्यभावघटितप्रत्यक्षसामग्र्यास्तत्रा
भावान्नोक्तदोषस्यानुमित्यनुपपत्तिरिति भावः। वस्तुतः अनुमितिसामग्री प्रतिबंधिका अनुमितिसामग्र्ये
व प्रतिबंधिका न तु भिन्नविषये प्रत्यक्षसामग्र्यनुमितौ प्रतिबंधिकेत्यर्थः। तथा च प्रत्यक्षसामग्र्याः समान
विषयकानुमितिं प्रत्येव प्रतिबंधकतया नैवोक्तानुमित्यनुपपत्तिरिति भावः॥ श्री॥ [illegible]
नेष्फलस्त्वोककार्यकारित्वमत्र संगतिर्बोध्या ननु लक्ष्यसामान्यमाह हेत्विति हेत्वाभासलक्षणमभि
त्यर्थः लक्ष्ये संग्राहयति याहीति तेन व्यभिचारादयः। ननु पक्षविषयकत्वेनोपनय[illegible]

रामः

मत्यक्षसामग्र्यनुमितौ प्रतिबंधिकेत्यर्थः। तथा च प्रत्यक्षसामग्र्याः समानविषयकानुमितिं प्रत्येव प्रतिबंधकतया
नैवोक्तानुमित्यनुपपत्तिरिति भावः॥ श्री॥ हेत्वाभासानिति। विजयफलस्त्वोककार्यकारित्वमत्र संगतिर्बोध्या ननु
लक्षणात्मकसाधारणधर्मज्ञानं विना विशेषजिज्ञासानुदयाद्विभागो निष्प्रयोजनक इत्यतो लक्षणमाह हेत्व
क्षणं त्विति। हेत्वाभासलक्षणं त्वित्यर्थः। लक्ष्ये लक्षणं याहयति तद्याहीति तेन व्यभिचारादयः। ननु पक्षविषयक
त्वेनोपनयस्वीयापर्यावच्छेदकत्वं न तथा च वह्निमान्ह्रदादिस्तत्र वह्न्यभावे इति व्याप्तिः पर्वतविशेष्यकवह्न्यभा
वप्रकारकनिर्णयत्वेन वह्न्यनुमितिप्रति प्रतिबंधकत्वे च वह्न्यभावविषयकत्वस्य प्रतिबंधकतावच्छेदकको
टिप्रविष्टत्वात्। न च स्वरूपसंबंधरूपावच्छेदकतापर्याप्त्यधिकरणत्वं अनतिरिक्तवृत्तित्वं वा अवच्छेदकत्वं
तृतीयार्थः वह्न्यभावविषयकत्वस्यावच्छेदककोटिप्रविष्टत्वे अवच्छेदकतापर्याप्त्यनधिकरणत्वात् अतिरिक्त
वृत्तित्वाच्च नातिव्याप्तिरिति वाच्यं अपर्याप्तिनिवेशासंभवापत्तेः अप्रामाण्यज्ञानानास्कंदितत्वस्याधिकस्य
प्रतिबंधकतावच्छेदककोटिप्रविष्टत्वात्। अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशे तु ह्रदो वह्निमान् ह्रदा
दिमादौ वह्न्यभावविशिष्टह्रदं वह्न्यापत्तेः प्रतिबंधकत्वाभाववति ह्रदद्वेत्यादौ ज्ञानेन वह्न्यभाववि

८१

मु.टी.

८४

शिष्टह्रदविषयकत्वस्य सत्त्वात्। विशिष्टह्रदस्य ह्रदानतिरेकादित्यत आह – यद्विषयकत्वं चेति। एतद्विशेषणस्य प्रयोजनमा
ह – तेनेति। बाधभ्रमस्य बाधभ्रमसाधारण्यस्य पर्वतविशेष्यकत्ववह्न्यभावप्रकारकत्वादेरित्यर्थः। अनुमितिविरोधित्वेपि
। अनुमितिविरोधितावच्छेदकत्वेपि न क्षतिः। न च वह्न्यभाववान् ह्रदवति व्याप्तिः इतरथा तु वह्न्यभावविषयकत्वस्य पर्वतेन
विशेष्यकवह्न्यभावप्रकारकत्वरूपानुमितिप्रतिबंधकतावच्छेदककोटिप्रविष्टत्वात्तत्रातिव्याप्तिस्स्यादिति भावः। यादृ
शविशिष्टेति विवक्षितेतु तत्र नातिव्याप्तिरित्याह तत्रेत्यादिना। न चैवं वह्न्यभावविशिष्टपर्वतस्याप्रसिद्धत्वेपि यादृशवि
शिष्टपदेन वह्न्यभावत्वविशिष्टवह्न्यभावमुपादाय तत्रातिव्याप्तिरिति वाच्यं। यादृशविशिष्टेति विवक्षणोऽनति
रिक्तवृत्तित्वस्यैवावच्छेदकत्वस्य लक्षणे निवेशनीयतया वह्न्यभावविषयकत्वस्य प्रतिबंधकताभाववत्तिवह्न्यभा
ववृत्तित्वानेवत्रेरत्वात्तिमास्येभावात्। न चैवं पर्वतो वह्न्यभावविशिष्टह्रदश्चेत्यत्रातिव्याप्तिरिति वाच्यं। यादृश
विशिष्टविषयकत्वेनेत्यस्य यत्स्वरूपावच्छिन्नविषयकत्वेनेत्यर्थकत्वात् तन्निष्ठस्य च तदनुमित्यर्थकत्वात् ह्र
दत्वज्ञानेन वह्न्यभावावच्छिन्न[illegible]विषयकत्वाभावात्। यत्र यादृशानतिरिक्तवृत्तित्वरूपस्यावच्छेदकत्वस्य विवक्ष
णेऽनुमितिप्रतिबंधकत्वाभाववति ह्रदे वह्निमान्न वेति संशये ह्रदो वह्न्यभाववानित्याहार्यनिश्चये प्रामाण्यज्ञानास्कंदि

रा

राम०

८४

तत्राहार्यनिश्चये च वह्न्यभावविशिष्टह्रदविषयकत्वस्य सत्त्वादसंभव इति चेन्न। ज्ञानस्येत्यत्र ज्ञानपदस्यानाहार्य
प्रामाण्यज्ञानानास्कंदितनिश्चयपरतया तादृशनिश्चयनिष्ठयादृशविशिष्टविषयकत्वमनुमितिप्रतिबंधकतानति
रिक्तवृत्ति तत्त्वमित्यर्थलाभादिति दिक्। सत्प्रतिपक्षस्यानित्यदोषत्ववादी शंकते। न च पक्षेति। विशिष्टस्याप्रसि
द्धत्वादिति। पाषाणमयत्वे वह्न्यभावव्याप्यत्वाभावादिति भावः। दृष्टांतेनेति। जपाकुसुमेन नीलप्रतिपत्तिरूप
त्वेपि न दुष्टत्वमिति भावः। अस्य च प्रतिबंधकीभूतभ्रमविषयस्यापि दोषत्वे। अनित्यदोषत्वापत्तेरिति।
पक्षे साध्याभावभ्रमदशायां सद्धेतावपि दोषत्वापत्तेरित्यर्थः। इत्थं च यादृशविशिष्टविषयकत्वेन
ज्ञानस्य प्रतिबंधकत्वं तादृशविशिष्टस्य दोषत्वं। हेत्वाभासिकमित्यादिना साध्याभावविशिष्टपक्षस्य परिग्रहः।
यादृशविशिष्टपदेन व्यभिचारत्वादिविशिष्टव्यभिचारादिकमाहाय लक्षणसंभवतीत्थं व्यभिचारविषयक
त्वस्य प्रतिबंधकतानवच्छेदकत्वात् व्यभिचारादिज्ञाने हेतुनिष्ठत्वे नातिरिक्तवृत्तित्वात्। किंतु व्यभिचारादिविशिष्टहेत्वा
दिकमेवाहाय कमादायैवेति व्यभिचारादिविशिष्टहेत्वादिकमेव दोष इति भावः। न तु व्यभिचारादिरि
ति। विशिष्टस्य हेतोर्दोषत्वे तद्वत्त्वस्य हेतौ सत्त्वाभावात् हेतोर्दुष्टत्वव्यवहारो न स्यात् न च तादात्म्येन तद्वत्त्वं विवक्षणी

अ०टी०
८५

यमितिवाच्यं तथा सति वह्न्यभावविशिष्टह्रदादेस्तात्तदात्म्येन धूमे ऽभावेन ह्रदपक्षकधूमस्य दुष्टत्वं न स्यादित्यत
आह तद्धत्वं चेति न च वह्निव्यभिचारविशिष्टद्रव्यत्वादेर्धूमे ऽपि सत्त्वादतिव्याप्तिरिति वाच्यं यादृशविशिष्टविषय
कज्ञानत्वेन यद्धेतुकानुमितिप्रतिबंधकत्वं तादृशविशिष्टस्य यद्धेतुवृत्तित्वं तस्यैव दुष्टत्वादिति सत्प्रतिपक्षादेरनि
त्यदोषत्ववादिनां मतमाह परे त्विति ननु वह्न्यभावादिमात्रे पर्वतादेर्नोपादानं शक्यत्वेपि तस्य साध्यमात्र[illegible]
नधूमस्य दुष्टत्वं स्यादत आह तद्धत्वं चेति ज्ञाने तिष्ठकत्वाविषयत्वे न तद्धत्वमित्यर्थः तद्धत्वस्य साध्याभावव
त्वस्य तत्त्वं बाधकालीनधूमादिसद्धेतावित्यर्थः अत्र प्रतिपक्षमशंकालीनधूमादिसद्धेतौ तत्कल्पनात्
ज्ञानस्य संबंधत्वकल्पनात्तेन सद्धेतावपि बाधित इति व्यवहारे तासंबंधत्वकल्पने ज्ञानस्य मद्विषयनीयतत्रा
ह तत्रेति बाधभ्रमकालीनसद्धेतावित्यर्थः प्रस्तुतार्थं न बाधितः पुरुषस्तु भ्रांतः तस्यैव हारादि इति भावः तो ह्रदा
व्यवहाराव्यवहारयोः स्वानुभवमात्रसाक्षिकत्वमाहुरित्यस्वरसबीजं यथाश्रुतविशेषितत्वसंगतैवीनमाह तिन
त्यादि नानाउक्तैवकत्तसाध्यकानुमितिप्रतितद्धेतौ तत्साध्यव्यभिचारग्रहाभावो हेतुर्दोषत्वस्य तत्राह तद
भावे तिन स्मृतिः नाव्याप्तिः न तत्र अलक्षणे अवच्छेदकत्वं न स्वरूपसंबंधविशेषः पूर्वोक्तदोषादिस्पनति

ग्र
एम०
८५

रिक्तवृत्तित्वमेव तिवेशनीयं तथा च धूमवान्वह्नेरित्यादौ प्रमेयत्वविशिष्टव्यभिचारे गतिव्याप्तिस्तद्विषयकत्वस्य
प्रतिबंधकतानतिरिक्तवृत्तित्वादत आह संसर्गपर इति प्रकृतानुमितिप्रतिबंधकतावच्छेदकीभूतघटितत्वेन
अनुमितिविरोधितावच्छेदकविशेषणीयं प्रमेयत्वविशिष्टव्यभिचारस्य प्रकृतानुमितिप्रतिबंधकतावच्छेदकी
भूतो यो व्यभिचारस्तद्घटितत्वे वेति न तत्रातिप्रसंग इति दिक् नन्वत्रानुमितितर्कसाधारणानामतरप्रतिबंधकत्व
मन्यतरनिष्ठप्रतिबध्यतानिरूपकत्वघटितं यदि तदा पर्वतो वह्निमान्धूमादित्यादौ वह्न्यभावविशिष्टह
दस्यापि दोषताप्रसंगः तस्य पर्वतो वह्निमान्ह्रदो वह्निमानिति समूहालंबनात्मकप्रकृतानुमितिनिष्ठ
प्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकत्वात् यदि च तादृशान्यतरत्वावच्छिन्नप्रतिबध्यतानिरूपकत्वघ
टितं तदा तादृशान्यतरत्वस्य कस्यचिन्मीत[illegible]प्रतिबध्यतानवच्छेदकतया असंभवः तादृशान्यतरत्वव्यापकप्रतिब
ध्यतानिवेशे च व्यभिचारादेर्वाव्याप्तिः व्यभिचारादेरनुमित्यविरोधितया बाधादेश्च व्याप्तिज्ञानाविरोधितया
तत्प्रतिबध्यतायास्तयोरविशेषान्यतरत्वाव्यापकत्वात् किंच तद्धर्मावच्छिन्नपक्षकतद्धर्मावच्छिन्नहेतुकानुमिति
तत्कारणान्यतराविरोधित्वलक्षणे निवेशनीयं मन्मथा पर्वतो वह्निमान्धूमादित्यादौ पर्वतत्वेद्दःकांच

२

त्वमपत्वाभावो हेत्वाभासः स्यात्। एवं च निर्वह्निः पर्वतो वह्निमान् निर्वह्नित्वे हि मातिस्पादौ न कोऽपि हेत्वाभास-
स्यात् तत्र शास्त्रभिन्नेर प्रसिद्धेरत आह। पाद्गृशसाध्येति। संभवेति। वायुर्गन्धवान् स्नेहादित्यादौ सर्वहेत्वाभाससं-
भवतीति भावः। हेत्वाभासलक्षणमुक्त्वा मूलेव स्वमाणेषु अनैकान्तिकादिलक्षणेषु क्वचित्कचित्किञ्चिद्दोषं तत्तद्धि
निधाय स्वयमनैकान्तिकादीनां लक्षणान्याह। स्वदभिन्निति। साधारणादीत्यादि नाम्ना धारणानुपसंहा-
रिणोः परिग्रहः। न त्वेतस्यानुमितितत्कारणज्ञानामन्यतरविरोधिज्ञानविषयत्वं भावात्कथं हेत्वाभासत्व-
मित्यतो दूषकताबीजमाह तेनेति। एवमग्रेऽपि क्रिया तद्व्याप्तिग्रह इति व्याप्तिघटकाव्यभिचारांशे व्यभिचारज्ञानस्य
प्रतिबंधकत्वादिति भावः। प्रतिबध्यतद्भिन्नव्याप्तिघटकीभूतसामानाधिकरण्यग्रहः प्रतिबध्यतद्दृत्यर्थः। ए-
वं च साधारणासाधारणानुपसंहारिणां व्याप्तिज्ञानप्रतिबंधकत्वाद् रूपदूषकताबीजैक्यान्नैकहेत्वाभास-
त्वमुपपद्यते साधारणेनाव्यभिचारग्रहस्यासाधारणेन सामानाधिकरण्यग्रहस्यानुपसंहारिणा च
व्यतिरेकव्याप्तिग्रहस्य प्रतिबंधादिति भावः। प्राचीनमतमाह अत्रेत्यादिति। पक्षे साध्यसंदेहदशायामे-
वासाधारणस्य हेत्वाभासता न तु निश्चयदशायां तदा पक्षस्यैव सपक्षत्वेन निश्चितसाध्यवद्व्यावृत्तत्वाभा-

वादित्यनित्यदोषत्वं तस्येत्याह। तस्यचेति। असाधारणस्य घटकसपक्षस्य पक्षभिन्नत्वघटितत्वे चेत्यर्थः। तत्र निश्चितसाध्यव-
ति पक्षे साधारणादिरूपाणामेकहेत्वाभासत्वानुपपत्तिर्दूषणीयमनेनास्वरसः सूचितः। व्यतिरेकव्याप्तिग्रहप्रतिबंधक-
त्वे केवलान्वयिसाध्यके चान्वयव्याप्तिज्ञानादेवानुमितिरितिभावः। न चैवं साध्याभावसाधकान्तत्प्रतिपक्षोऽपि हि रूपस-
भेदेन स्यादत आह। सत्प्रतिपक्षेत्विति। प्रतिहेतुः प्रतिकूलोऽपि तु पाहे तु इति विशेषः। न सन्नयो भेदः। न तु रूपकतावी-
जैक्येऽपि हेतुभेदे सत्प्रतिपक्षो हेत्वेकविरुद्धरूपे हेत्वाभासांतरभिन्नस्य तेन तदापत्तावन्वयिनाहेतुतरेण प्रतिरोधस्त-
त्र सत्प्रतिपक्षोऽपत्रतु व्यतिरेकिणा तत्र हेत्वाभासांतरं स्यादतो भेदकांतरमप्याह। साध्याभावेति। व्यक्तगत्या साध्याभा-
वसाधके हेतावेव तत्साध्यसाधकत्वभ्रमनिवृत्तिस्तथा नान्वादिने प्रतिभ्रमरूपाभावात्सूचकत्वविरुद्धस्य न त्वेवं सत्प्रति-
पक्षस्येति भावः। साध्याभावव्याप्येति। एवं साध्यवत्त्वव्याप्यवान्पक्षः पक्षनिष्ठो साध्याभावसाध्यवत्त्वव्याप्या-
वच्छेदो मत्वादिना अनुगमानविभागव्याघात सत्प्रतिपक्षव्यवहारोपाधिकमन्येषां सत्प्रतिपक्षत्व-
यामाह अन्ये हेतेति। नित्यत्वव्याप्यवद्धेरवत्त्वाद्यानत्यकालीनां नित्यत्वव्याप्यहेतुकत्वपरामर्शसत्त्वेऽपि स-
त्प्रतिपक्षव्यवहाराभावात्तत्कालीनां तमुपस्थिविशेषणं। गृहीतात्पर्यामापकनित्यत्वव्याप्यवज्ज्ञानकालीना नित्य-

मु॰टी॰
८७

त्वव्याप्यत्वप्रकारकत्वपरामर्शे सत्त्वेपि तद्व्यवहाराभावाद्गृहीताप्रामाण्यकेति प्रथमोपस्थितिविशेषणं ज्ञाहयक
लीनातित्वव्याप्यवत्तापरामर्शसत्त्वेपि तत्राप्रामाण्यग्रहकाले तथा व्यवहाराभावाद्गृहीताप्रामाण्यकत्वं द्वितीयो
पस्थितिविशेषणं व्यवहारमात्रे च योगिनो निरुक्तरूपस्य प्रकृततानुपयोगात्॥ उपस्थितिघटितस्योक्तरूपस्य स्वरूप
सत एवोपयुक्तस्याभासतया पामरसंयोजकतात्वाहितस्य स्वरससूचयन्नस्य रीतिः सत्प्रतिपक्षस्य दूषकतावीजं प्रदर्श
यति। अत्रेत्यादिना सत्प्रतिपक्षस्य संशयजनकत्वं दूषकतावीजं न त्वनुमितिप्रतिबंधकत्वं तदभाववद्व्याप्यवत्ताज्ञान
स्यानुमितिप्रतिबंधकत्वे मानाभावादिति रत्नकोशकारमतं दूषयितुमुपन्यस्यति। अत्र केचिदित्यादिना। अनु
तिर्भवत्येवेति। अनुमितिं प्रति तदभाववद्व्याप्यवत्ताज्ञानस्य प्रतिबंधकत्वे मानाभावात् तद्रूपतत्तदभाववदनुमिति
सामग्र्याभ्यामेव तत्तदभावकोटिकसंशयानुमित्युपपत्तौ संशयानुमितिं प्रत्युभयथाप्यवत्तानिश्चयत्वेनातिरिक्तहे
तुताकल्पने प्रत्युक्तगौरवाभावान्नेति भावः। न तु यद्युभयथाभासकसत्त्वेऽप्युभयभानं तदपि पित्तादिदोषसत्वेपि पीतत्वप्र
क्तत्वेभयस्सत्तात्वभयोर्भानापत्तिरित्यत आह। फलबलेनेवेति न पावकत्वपीतत्वसाक्षात्कारस्यैवानुभविकतया
मुक्तत्वयं हे पित्तरूपदोषस्य प्रतिबंधकत्वं कस्यपित्वापीनसाक्षात्कारसामग्र्या अधिकबलवत्त्वमेव कल्प्यत्व दोषस

त्यपि द्रष्टव्यम्। स्थाणुत्वपुरुषत्वयोः संशयस्यैवोदयात्तत्सामग्र्योः समबलत्वमेव कल्प्यत इति भावः। ज्ञानमात्रे तादृ
शज्ञानत्वावच्छिन्ने विशेषदर्शनविशेषाजन्ये गौरवादिति। कार्यकारणभावद्वयकल्पने गौरवादिति भावः। कथम
नुमितिरिति। अनुमितेरपि प्रतिबध्यतावच्छेदकाक्रांतत्वादिति भावः। कथं तर्ह्युभयव्याप्यवत्तानिश्चयात्मा सत्प्रति
पक्षः संशयद्वारा साध्याभावकानुमितिर्भवत्येव तावत्तन्निश्चये अप्रामाण्यग्रहस्य तत्साहाय्यं यत्र चेति। आश्रयासिद्ध्यादीत्यादि
ना स्वरूपासिद्धिव्याप्यत्वासिद्ध्योः परिग्रहः। साध्याप्रसिद्ध्यादीनामाधिक्यं निराकरोति। साध्याप्रसिद्ध्यादय इति
। आदिना साधनाप्रसिद्धिः। न चैतत्त्व्याप्तिसत्त्वेपि नीलधूमत्वस्यानवच्छेदकतया तदवच्छेदेन व्याप्यत्वासिद्धि
रेवेति वाच्यं अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य नीलधूमत्वेपि सत्त्वात्। स्वरूपसंबंधरूपावच्छेदकत्वाभावा
द्व्याप्यत्वासिद्धिरित्यपि न। तथा सति पशुमान् स्यादिति मतद्रव्यादावपि व्याप्यत्वासिद्ध्यापत्तेः सास्नादेः पशुव्याप्ये
गोत्वादिना तेन रूपेण सास्नादेः स्वरूपसंबंधरूपावच्छेदकत्वाभावात्। अत एव नीलधूमत्वादेः स्वरूपसं
बंधरूपावच्छेदकत्वाभावात्तदवच्छेदेन व्याप्यभावरूपव्याप्यत्वासिद्धिर्नतु तस्याहेत्वाभासत्वं। अनुमितिकार
णीभूतव्याप्तिज्ञानाविरोधित्वात्। न च वह्निमद्द्रव्यमिति प्रमेयवानिति प्रमेयत्वसामानाधिकरण्येन व्याप्यवगा

मु·दी·
८८

हि ज्ञानादृष्टमित्यापत्तिवारणाय हेतुतावच्छेदकावच्छेदेन व्याप्तिज्ञानस्यैव कारणतया तद्विरोधितायाः निरुक्तव्याप्य
त्वासिद्धिर्हेत्वाभास इति वाच्यं तावतापि नातिरिक्तहेतोर्नित्यरूपावच्छेदकत्वज्ञानस्य कारणत्वेपि तत्र स्वरूपसंबंध
रूपावच्छेदकत्वाभाववद्ग्रहस्याप्यभावानवगाहित्वेन विरोधित्वात् तस्माद्यथाविशेषणस्य पक्षतेन व्याप्यत्वासि
द्धिर्हेत्वाभासः पुरुषस्त्वधिके न निरूप्यत इति। साध्याभाववदवृत्तित्वाद्विना साध्यवदन्यत्वस्य पक्षसाहचर्यसाध्यादेश्चोपरि
ग्रहः तद्धर्मिकतदभाववत्ताविषयकत्वानाहार्यप्रामाण्यज्ञानानास्कन्दितत द्धर्मिकतदभाववन्निश्चयः। बाधबुद्धेस्तु जनरसुरी
लौकिकसन्निकर्षजन्यविशिष्टबुद्धित्वानुभविकत्वादाह। लौकिकसन्निकर्षाजन्येति। नन्वेवं तदिन्द्रियजन्यलौकि
कबाधनिश्चयोत्तरं तदिन्द्रियजन्यलौकिकविशिष्टबुद्ध्यापत्तिरिति चेन्न अलौकिकत्वं प्रतिबध्यतावच्छेदककोटा
वनिवेश्य तदिन्द्रियजन्यतद्विशिष्टबुद्धौ तदिन्द्रियजन्यलौकिकतदभाववन्निश्चयत्वेन प्रतिबंधकत्वोपगमात् एत
दिन्द्रियजन्यापनीतभानात्मकबाधनिश्चयोत्तरं तदिन्द्रियजन्यलौकिकतद्विशिष्टबुद्ध्युदयात्प्रतिबंधकतावच्छेद
ककोटौ लौकिकत्वस्य निवेशः। नन्वलौकिकतदिन्द्रियजन्याभावप्रमास्थले तदधिकरणे प्रतियोगिनोऽभ्रमत्वादे
वन तद्विशिष्टलौकिकप्रत्यक्षापत्तिरित्यलं तथाविधप्रतिबध्यप्रतिबंधकभावेनेति वाच्यं। यत्र प्रतियोग्यधिकरण

एम०

प्र

एव सन्निकर्षस्याधिकरणांतरवृत्तेरभावस्य प्रत्यक्षात्मकं रोपो दोषेण जनितस्तदुत्तरं तदधिकरणे प्रतियोगिनो
लौकिकप्रत्यक्षापादनात् तत्राभाववल्लौकिकप्रत्यक्षजनकदोषस्य प्रतिबंधकत्वादेवनेयमापत्तिरन्यथाऽभावा
रोपोऽस्तु प्रतियोगिप्रत्यक्षापत्तिरिति तु न यत्र विनष्टस्थदोषेणाभाववल्लौकिकप्रत्यक्षात्मकारोपस्तदु
त्तरं प्रतियोगिप्रत्यक्षापत्तिरिति तु न भ्रमवादिना पादनात् यत्राभाववल्लौकिकप्रमा समकालं तद्द्वितीयक्षणे वा
तदधिकरणे प्रतियोगिप्रकारकानुभयमानारोपजनकदोषसमवधानं तत्राभावप्रमोत्तरं प्रतियोगिनो लौ
किकप्रत्यक्षात्मकारोपापादनवारणाय वा इन्द्रियभेदेन तथाविधप्रतिबध्यप्रतिबंधकभावोपगमात्। शंखो
न पीतः। वंशो नोरग इति निश्चयेपि पित्तमंडूकवसांजनादिदोषवशात् शंखः पीतः अयमुरग इत्यारोपोदयात्तत्र व्य
भिचारवारणायाह दोषविशेषेति। दोषसामान्याजन्यत्वनिवेशे भ्रममात्रस्यैव बाधाप्रतिबध्यत्वापत्तिरतो वि
शेषेति। तथा च पित्तमंडूकवसांजनादिदोषाविशिष्टापादकतज्जन्यत्वं प्रतिबध्यतावच्छेदककोटौ नि
वेशनीयमिति भावः। तत्रापि तत्तद्भ्रमात्मकदोषाजन्यत्वनिवेशोत्र यथा शंखः पीत इति भ्रमे शंखत्वांशे भ्रमा
नस्यैव पित्तद्रव्यपीतिमत्वारोपोपगमेन तदंशे लौकिकत्वादलौकिकत्वस्य प्रतिबध्यतावच्छेदके निवेश

देवतत्रव्यभिचारवारणादितिवाच्यं।पित्तदूष्यस्यांतरानवस्थानेन भ्रमापन्नपित्तस्यैवेति सः शंखादौ प्रत्यक्षोदयेन सम
येमाणारोपस्यैवतत्रनवीनैः स्वीकारात्तदंशे तस्यालौकिकत्वात्। तथा सति पीतः शंखः पीत इति प्रत्यक्षोत्तरं पीतं सा
क्षात्करोमीति साक्षात्काशित्वग्रहानुपपत्तिस्तद्व्यंजकलौकिकविषयतायास्तत्राभावादिति तु न। लौकिकविषय
ताया इव दोषविशेषजन्यत्वस्यापि साक्षात्कारित्वव्यंजकत्वात्स्मृत्याद्यनुरोधादिति स्मर्यमाणारोपे साक्षात्कारि
त्वग्रहानुपपत्तेः। शंखो न पीत इत्यादितोदिंद्रियजन्यवाधबुद्ध्युत्पत्तेरपि तत्रादिदोषवशात् इंद्रियजन्यः शंखः पीतइ
त्यारोपोप्यनुभवसिद्धस्तदा पूर्वोक्तेंद्रियभेदभिन्नप्रतिवध्यप्रतिवंधकभावेपि दोषविशेषाजन्यत्वं प्रतिवध्य
तावच्छेदके निवेशनीयमिति ध्येयं। ननु वाधप्रतिवध्यतावच्छेदककोटौ लौकिकात्वस्य निवेशे वाधनिश्च
योत्तरं लौकिकसन्निकर्षजन्यसंशयापत्तिरिति चेन्न। अभ्रं तं लं घटवदित्याद्याकारकलौकिकप्रत्यक्षे सन्निकाले
ख्यातेष्वेकं चिद्दपि घटत्वप्रसंगाभावादेर्भेदे न प्रकारतयाभानवारणाय समानधर्मितावच्छेदककत
त्कोटिलौकिकप्रत्यक्षसामग्र्या विपरीतकोटिभानप्रतिबंधकत्वमवश्यमंगीकरणीयं। तथा च वाधनिश्च
योत्तरमपि नापत्तिर्लौकिकसन्निकर्षजन्यसंशयस्य तत्कोटिलौकिकप्रत्यक्षसामग्र्याः प्रतिबंधिकायाः स

त्वेन विपरीतकोटिभानसंभवात्। दिविभानासंभवात्तदिहक्कापि लौकिकसन्निकर्षजन्यसंशयोत्पत्तिरिति चेदेवमन्य
नभत्यासत्त्येव पूर्वोपस्थितकोटिभानसंभवादितिप्रजुसंशयपरं वैतत्कोटिद्वयांशे लौकिकसन्निकर्षसत्त्वे कथं संशय
स्य न लौकिकत्वं कथं वा तत्र संशये विपरीतकोटिभानं तत्कोटिलौकिकप्रत्यक्षसामग्र्याः प्रतिबंधिकायास्तत्र सत्त्वा
दिति। [illegible]। तन्न लौकिकसन्निकर्षसत्त्वेपि संशयजनकदूरत्वादिदोषसत्त्वे लौकिकप्रत्यक्षप्रतिबंधकस्य सत्त्वे न लौ
किकप्रत्यक्षसामग्र्यभावादुभयोपपत्तेरित्यलमत्र विस्तरेण कस्यचिन्मतं दूषयति। नन्विति। इतिपुत्क भित्यनेनान्व
यः। नन्वेवं वाधनिश्चयकाले संस्पृष्टज्ञानाभावादेवानुमित्यभावोपपत्तौ वाधनिश्चयस्यानानुमितिविरोधित्वमि
ति हेत्वाभासत्वं न स्यादत आह तद्विरोधितयेति। अनुमितिकारणीभूतसाध्यसंसृष्टत्वज्ञानविरोधितयेत्यर्थः।
नन्वप्रसिद्धसाध्यकानुमितिः कुत्रापि न भवत्येवेत्यत आह। साध्यसंशयेति। ननु संशयस्यान्यकालीपक्षिसाध्यपक्ष
कालीनसाध्यनिश्चयात्मकसाध्यसंसृष्टत्वज्ञानमस्त्येवेत्यत आह। आहार्येति। आदिना सिषाधयिषाकालीन
ह्रिपरिग्रहः। न च संभाव्यान्तरोत्पत्त्येवानुमितिरिति वाच्यं। सति विशेषदर्शने संशयायोगात्। पक्षविशेष्यकसा
ध्याभावज्ञानप्रमात्वनिश्चयोनुमितिप्रतिवंधकस्तदभावः कारणमतस्तद्देशप्रमात्वमेव वाध इति प्राची

मु.टी.

८८

नमतं हृस्वपति। एवमितिप्रमात्वज्ञानमपि। प्रमात्वनिश्चयोपि। मानाभावादिति। ग्राह्याभावानवगाहित्वा हृष्प्र
ज्ञानस्यविरोधित्वेमानाभावादित्यर्थः। ननु पक्षे साध्याभावज्ञानेपितत्राप्रामाण्यज्ञानकाले नुमितेरुत्पत्त्या साध्या
भावज्ञानं प्रतिबंधकं। असत्यसने तत्तत्र साध्याभावज्ञाने प्रमात्वनिश्चयाभावादेवानुमिसुत्तिरित आह। गौ
रवादिति। तथाचतत्रानुमितिनिर्वाहाय संशयनिश्चयसाधारणाप्रामाण्यज्ञानाभावस्यैव प्रतिबंधकतावच्छेदक
कोटौ निवेश्यतेनतु पक्षविशेष्यकसाध्याभावज्ञानप्रमात्वनिश्चयत्वेन प्रतिबंधकत्वं गौरवादित्यर्थः। पत्रपक्षे साध्या
भावज्ञानमस्तिनतुतत्रप्रामाण्यज्ञानं नवाप्रामाण्यज्ञानं तत्राप्यनुमितिर्नभवत्येवेतिभावः। साध्याभाववत्प
क्षघटितप्रमात्वविषयकत्वेऽनुमितिप्रतिबंधकतानतिरिक्तवृत्तित्वसत्वात्तस्याभासत्वं दुर्वारमितितुनभ्रमेपक्षः
विशिष्टव्यभिचारादेरिवतादृशविशिष्टांतरघटितत्वेनाभासत्वायोगादिति। ननुगृहीतप्रामाण्यकसाध्याभा
वनिश्चयस्य प्रतिबंधकत्वेप्रथमोपस्थितप्रमात्वनिश्चयएवतत्र्यास्यादत आह अन्यथेति। सत्यमितिपक्षेप्रा
थिस्यादिनाऽसिद्धादिपरिग्रहः। प्रतिबंधकत्वापत्तेरित्यस्याग्रेमिसाहाय्यादिः। ननु साध्याभावज्ञानप्रमात्व
ज्ञानेऽनुमितिप्रतिबंधस्तदभावेतुनेत्यन्वयव्यतिरेकाभ्यांप्रमात्वज्ञानस्यानुमितिप्रतिबंधकत्वमत आह

एम०

किंत्विति। क्वचिदुपयुज्यत इति। तथाचानुमितितत्कारणज्ञानान्यतरंप्रतिसाक्षात्प्रतिबंधकीभूतज्ञानविषयत्वा
भावान्नसाध्याभावप्रमात्वंहेत्वाभास इतिभावः॥ व्यभिचारज्ञानादेरित्यादिना। सिद्धिज्ञानपरिग्रहः। भेदादिति
तथाचवाधस्थलेऽसिद्धिव्यभिचारान्यतरनियमेपिवाधज्ञानस्यव्यभिचारादिविषयकत्वाभावेननतस्यहेत्वाभा
सांतरत्वमितिभावः। नचहेतुमान्पक्षः साध्याभाववानित्याकारकएववाधग्रहः कुतो नभवतिसामग्रीसत्वा
त्तथाचव्यभिचारज्ञानात्मिकैववाधबुद्धिरितिवाच्यं। परामर्शात्मकव्यभिचारज्ञानरूपप्रतिबंधकसत्वेनवा
धबुद्धेर्व्यभिचारविषयकत्वासंभवात्। एकत्रहेतौव्यभिचारविषयकैकनिश्चयासंभवाच्च। नन्वयोगोलकपक्षक

व्यभिचारा

धूमसाध्यकवह्निहेतुकेवाधलौकिकप्रत्यक्षवद्व्यभिचारलौकिकलौकिकप्रत्यक्षमपिव्याप्तिनिश्चयेसत्यपिभवि
ष्यतीत्यत आह। किंचेति। अर्किंचित्कर इति। व्यभिचारज्ञानंहिअनुमितौनसाक्षात्प्रतिबंधकं। किंतु परामर्श
प्रतिबंधद्वारा तथाचपरामर्शोत्तरकालीनंव्यभिचारज्ञानमकिंचित्करमितितत्रवाधबुद्धिरेवप्रतिबंधिकेतिभा
वः। व्यभिचाराद्यसंकीर्णमपिवाधंमदर्शयति। एवमित्यादिना। वाधस्यैवेति। तेनपक्षेहेतुसत्वेनस्वरूपासिद्धेः
प्रतियोगिव्यधिकरणसाध्याभाववद्वृत्तित्वरूपस्यव्यभिचारस्यचाभावादितिभावः॥ वाधतव्याप्यभिन्ना

मु.टी.
८०

पहेत्वाभासान्तर्भावात् अपि तन्मध्ये एवांतर्भवंतीति पाठः । बाधस्य साध्याभाववद्विशिष्टपक्षादिः तद्व्याप्यस्य सत्प्रति-
पक्षस्य च विशिष्टभिन्नेन व्यभिचारविरुद्धासिद्धान्तःपातित्वात्तेष्वेवान्तर्भाव इत्यर्थः । व्यभिचारादीनां व्यभिचारादिव्याप्यस्यापि
व्याप्तिग्रहप्रतिबंधकत्वाद्विषयत्वेन पंचहेत्वाभासानां तदंतर्गतत्वे तस्मातिरिक्तहेत्वाभासत्वं स्यादित्यर्थः । न प्रति-
बंधक इति साध्याभावव्याप्यव्याप्यवत्ताज्ञानस्य साध्यवत्ताज्ञानविरोधित्वे मानाभावादिति भावः । इष्टकत्वावी-
जस्य भिन्नत्वेऽपि तौ साधारणस्य व्यभिचारज्ञानेऽपि हेतुसामानाधिकरण्यग्रहे [illegible] इति [illegible]
पक्षत्वविपक्षत्वप्रतिबंधकत्वमपि [illegible] बंधकत्वादिति भावः । असाधारणपदघटकं सपक्षत्वं निश्चयगर्भं न
तु साध्यवत्त्वमात्रमित्याह । सपक्ष इति । एवमग्रेऽपि । सपक्षत्वविपक्षत्वविवक्षायां निश्चयनिवेशस्य फलमाह । आ-
द्यत्वादिना पूर्वोक्तमिति । असाधारणः साध्यासमानाधिकरण इत्यादिना [illegible] किं च [illegible] पक्षक-
नीति [illegible] साध्यसंशयरूपाभावप्रसङ्गात्तेन सर्वमभिधेयं प्रमेयत्वादित्यादौ पक्षासिद्धि [illegible]
तदा साध्यनिश्चयसंभवेन सामानाधिकरण्यघटितव्याप्तिग्रहसंभवे [illegible]
घाविरहविशिष्टस्य अभावस्य तद्वाकेवलान्वयित्वेऽपि तत्र नास्ति व्याप्तिः । अनुपसंहारिणो हेत्वाभासत्वमपपा-

सु

रा ९०

दयति । सर्वमभिधेयमित्यादिना । सर्वस्यैव पक्षत्वात् सामानाधिकरण्यग्रहस्यासंभवादिति । संशयोत्पत्तिस्थलेऽनि-
श्चयवारणाय निश्चयं प्रतीति । संशयसामग्र्याः प्रतिबंधकत्वस्यावश्यं वाच्यत्वे [illegible] साध्यसंदेहसत्त्वे न तत्-
त्वं तत्सामग्र्याः सत्त्वेन साध्यनिश्चयसत्त्वाप्यसंभवेन व्यापकसाध्यसामानाधिकरण्यविशिष्टधर्मत्वादिरूप
व्याप्तिग्रहानुत्पादान्तरात्मिति [illegible] अनुपसंहारिणो हेत्वाभासत्वमिति भावः । [illegible] तदानीमपि
केवलान्वयिपक्षताकत्वरूपस्यानुपसंहारित्वस्य पक्षेतरभावादिति [illegible] तथावतत्रापि अनुपसंहारित्वस-
त्त्वात्तस्य व्याप्तिग्रहाप्रयोजकत्वाभावाद्धेत्वाभासत्वानुपपत्तिरिति भावः । न च संशयसामग्र्याः सत्त्वात्क-
थं पक्षैकदेशे साध्यनिश्चय इति वाच्यम् । सत्त्वेऽपि तद्धर्मितावच्छेदकक संशयसामग्रीसत्त्वेऽपि घटत्वादिधर्मितावच्छेद-
कक साध्यनिश्चयोत्पादे बाधकाभावात् समानप्रकारकत्वेनैव विरोधात् । समानविषयत्वे न प्रतिबंधकत्वव्या-
हत्याक्षेवेति तस्य सहचारग्रहस्य [illegible] स्वरूपसत एव विरोधित्वेन [illegible] अनुत्पादप्रयोजकत्वा-
भावादिति भावः । न च तत्र सहचारग्रहप्रयोजकसंशय एव हेत्वाभासस्तस्यापि स्वरूपसत एव विरोधित्वा-
त् । न च संशयविषयस्य साध्याभावविशिष्टपक्षादेरेव तत्राभासत्वमिति वाच्यम् । सर्वमभिधेयमित्यादावभि-

मी

मु.टी.

९१

धेयत्वाभावविशिष्टपक्षाप्रसिद्धेरित्यन्यत्र विस्तरः॥ तदर्थ इति॥ तेन साधारणेनानित्यत्वादिनेति भावः॥ धूमप्रागभावत्वे
नेति तस्य व्याप्यतावच्छेदकीभूतधूमत्वघटितत्वेन तत्संग्रहो न स्यादिति भावः॥ स्वस्य स्वाविषयकप्रतीतिविषयत्व
रूपस्याघटितत्वाभावाद्धर्मेतरेति॥ न च नीलधूमत्वस्यापि तादृशधर्मेतराघटितत्वमस्त्येव धूमत्वस्य नीलधू
मत्वभिन्नत्वाभावादिति वाच्यं स्वाविषयकप्रतीतिविषयत्वस्य स्वपर्याप्तावच्छेदकतानिरूपकप्रकारतानिरू
पितावच्छेदकतापर्याप्त्यनधिकरणत्वपर्यवसितस्य तदर्थत्वात्॥ शुद्धधूमत्वपर्याप्तावच्छेदकताकप्रकारत्व
नीलत्वादिविशिष्टधूमत्वपर्याप्तावच्छेदकताकप्रकारत्वयोर्भेदात्॥ नन्वेवं वह्निमत्साध्यकत्वस्य वह्निव्याप्य
तावच्छेदकत्वानुपपत्तिः तस्य वह्नित्वरूपतादृशधर्मेतरघटितत्वात्॥ धूमान्यान्यत्वादेर्व्याप्यतावच्छेदकत्वा
पत्तिश्चापि धर्मेतरस्य विशेष्यविधया घटकत्वविवक्षणस्याशक्यत्वादिति चेन्न॥ स्वसमानाधिकरणपदेन
स्वव्यापकस्य विवक्षितत्वात् तच्च वह्नित्वस्य वह्निमत्साध्यकत्वाव्यापकत्वाद्धूमत्वस्य धूमान्यान्यत्वाव्यापक
त्वाच्चोक्तदोषासंभवात् स्वव्यापकत्वं च धर्मेतरस्य स्वघटकसाध्यसंबंधितावच्छेदकत्वेनान्यथा धूमा
लोकान्यतरत्वस्य वह्निव्याप्यतावच्छेदकत्वापत्तेः धूमत्वालोकत्वयोः प्रत्येकमन्यतरत्वाव्यापकत्वादिति वि

रामः

रूपोः परस्परमेवैहेत्वोरित्यत्र विरुद्धयोर्हेत्वोः॥ परामर्शद्वय इति भ्रमवारणायाह॥ स्वसाध्येति॥ सत्प्रतिपक्षत्वेना
भिमतो हेतुः स्वसाध्यस्य विरुद्धोपः साध्याभाववदित्यर्थः॥ ननु तत्तत्कालीनघटदृष्ट्यादि मूलोक्तमयुक्तं॥ तत्र पक्षे
ष्टेगंधस्य सत्त्वभावात्तत्राह पक्षतावच्छेदकेति॥ कालस्येव देशस्यापि पक्षतावच्छेदकत्वे बाधसंभवात् दर्शने
न मूलस्यान्यतरतां परिहरन्नेमाह स्वाभितिबोध्यमिति॥ तत्र पक्षे हस्तसंयोगसत्त्वेपि पक्षतावच्छेदकमूलावच्छेदे
न संयोगाभावादिति भावः॥ स्मृत्यनुमानेत्यवसरसंगतिमभिप्रेत्याह॥ उपमितिमिति॥ तत्र गवयेन्ताः दृशपदं दर्शनस्या
दृश्यप्रत्यक्षं तदुपमितिकरणमिति॥ नवीनमते नैतत्॥ अतिदेशवाक्यार्थशाब्दबोधः करणमतिदेशवाक्यार्थ
स्मरणं व्यापारः॥ सादृश्यविशिष्टपिंडदर्शनं सहकारीति संप्रदायमतं तु सहकारिता या आवश्यकसादृश्यविशि
ष्टपिंडदर्शनस्यैव करणत्वमुक्तं मिस्तु पश्चिमं तास्मरणं ज्ञायत इति॥ सादृश्यविशिष्टपिंडदर्शनस्योद्बोधकविध
याता दृश्यवाक्यार्थस्मारकत्वादिति भावः॥ अत एव व्यापारवृत्तिस्ते न सादृश्यविशिष्टपिंडदर्शनोत्तरं पत्रातिदे
शवाक्यार्थशाब्दबोधस्तत्रातिदेशवाक्यार्थस्मरणापेक्षाभावान्नातिदेशवाक्यार्थस्मृतिर्व्यापारः किं सादृश्यवि
शिष्टपिंडदर्शनं करणं किंतु सोऽयं पदज्ञानमात्रकरणविशेषणाज्ञाननिविषयातज्जन्यमतिदेशवाक्यार्थज्ञानस्य

मु.टी. १०

दृश्यविशिष्टपिंडदर्शनं चोभयं व्यापार इति कश्चिन्न तत्प्रत्युक्तं पञ्च सादृश्यविशिष्टपिंडदर्शनोत्तरमतिदेशवाक्यार्थ
२२ शाब्दबोधस्य चोपमित्यनभ्युपगमात् किं तु तदुत्तरं पुनस्सादृश्यविशिष्टपिंडदर्शनं ततोऽतिदेशवाक्यार्थस्मरणं तदुत्त
रमेवोपमितिरिति भावः गवयो गवयपदवाच्य इति ज्ञानं त्वापत्त इति एतेनोपमितिर्न प्रमितं तत्तं किं तु शाब्दबोधात्म
कैव गोसदृशो गवयपदवाच्य इत्यत्र सदृशपदेनोपस्थितं न सादृश्यावच्छेदेन गवयपदवाच्यत्वं यद्यपि गोसदृशो ग
वयपदवाच्य इत्याकारकस्यैवोपमितित्वं स्वरूपतादिस्त्यपार्थं गवयत्वावच्छेदेन गवयपदवाच्यत्वविषयिणोपाठप
मिति गवयपदजन्यगवयत्वविशिष्टोपस्थितिं विना शाब्दबोधरूपत्वासंभवादिति तिनवगोसादृश्यस्य गवयत्वस्य
च प्रत्यक्षेणोपस्थितौ कथं गवयत्वावच्छेदेनैव गवयपदवाच्यत्वोपमितिर्न तु सादृश्यावच्छेदेनेति वाच्यं उपस्थि
तेऽत्योऽप्येवमपि गवयत्वज्ञानस्य पृथक् पागो[illegible]सादृश्यस्य गोरवज्ञानेनैतदवच्छेदेनैव पदवाच्यत्वोपमितेरनुदयात् गवय ग
पदात् गवयत्वप्रकारकशाब्दबोधोपपत्तेः तत्प्रकारकशाब्दबोधेन तदवच्छेदेन पङ्क्तिः यद्वा सहेतुत्वात् नवव
च्यत्वविशिष्टसादृश्यज्ञानात् गवयत्वावच्छेदेन गवयपदवाच्यत्वोपमितेरनुदयात् तद्धर्मविशिष्टसादृश्यज्ञाने
तद्धर्मावच्छेदेनोपमितिरिति न कवाच्यं तथा च पदात् गवयत्वादिज्ञानस्योपस्थितिः क्वचित् सादृश्यस्य संख्यानाद्गुरुध १४०

र्मविशिष्टेयत्तां ज्ञात्वावच्छेदेन गवयादिपदवाच्यत्वोपमित्युपमितिरिति वाच्यं व्याप्तेः तस्या भ्रमत्वेन तादृशगुरुधर्मा
वच्छेदेन गवयादिपदवाच्यत्वासाधकत्वादिति इदं तूपलक्षणम् वैधर्म्यविशिष्टपिंडदर्शनेन करणेन जलादिविधर्म
गुणवती पृथिवीति स्मृतिदेशवाक्यार्थस्मरणं व्यापारः पृथिवीत्वावच्छेदेन पृथिवीपदवाच्यत्वोपमितिः फलमित्यपि
बोध्यं न च प्रमाणस्य प्रमाणान्तरत्वे मानाभावः न च प्रत्यक्षादिप्रमितिविजातीयप्रमितिकरणत्वात् स्वप्रमाणान्त
रत्वमुपमितेः प्रत्यक्षादिप्रमितितो विजातीयत्वाभावादिति चेन्न चक्षुरादिव्यापारविगमेऽप्युपमिनोमीति हृत्पादेन
चाक्षुषादित्वासंभवात् नवा मानसत्वं मानसोऽनुमनुते सर्वमानापाउपमिनोमीति प्रतीतेर्विषयत्वात् उपमि
त्युत्तरं साक्षात्करोमीति प्रतीतिः [illegible] नैरन्तर्येन तत्रापि प्रत्यक्षत्वस्य प्रमाणाभावात् [illegible] उपमितेरपि मानसत्वाप
त्तेः नाप्यनुमितिः व्याप्त्यादिज्ञानं विनाप्युदयात् न शाब्दं पदज्ञानाजन्यत्वात् न स्मृतिरननुभवत्वात् स्मरणापा
गादिति संक्षेपः श्री: उपजीव्योपजीवकभावसंगतिमभिप्रेत्याहमले परक्षानैचिति एवकारार्थे समल
स्यतु शब्दस्य अवच्छेदस्य पतिमुक्त्वा वस्तां नतु ज्ञापमानमितिमेतिस्थेः काकादावित्यादिनाऽत्वादिबोधकवि
जातीयहस्तचेष्टादेः [illegible] सर्वस्यापि [illegible] मात्रस्य व्यापारत्वे [illegible] परजन्यपदार्थोपस्थितावपि घटक

तं १

मु.टी.

८३

त्वंसत्वम्पर्यः अन्यथान्हस्येसस्यानुपादाने नतु वन्निपेदिशक्तिलक्षणा गंगापदात्तीरा गंगापदस्मीत्येवं बोधोनस्यात् श
क्तापूरजन्मतीरोपस्थितेरभावादत आह वृत्तिरपीति अन्यतरसंबंधः अन्यतरात्मकः संबंधः अत्रैवापरजन्मपद
र्थोपस्थितावेव सा चेति यद्यपि दृष्टस्मरे छायापाये क्वाद्धृदशक्या हृदो वा ह्व्यरतीस्मरे छायापदेपीसतिप्रसंगः एवं गंगा
पदजन्मबोधविषयत्वप्रकारकेच्छायाः तीरेपि सत्वात् छत्रमवतीरबोधोपपन्नेर्लक्षणोच्छेदापत्तिस्तथापि गंगादि
पदवाच्यत्वव्यवहारस्तीरादिभिन्नेः भावादृग्णादिपदजन्मबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितवि
शेष्यतासंबंधेनस्मरेच्छेव गंगादिपदानां शक्तिः तीरादिनिष्ठविशेष्यतायां गंगादिपदजन्यबोधविषयत्वप्र
कारतानिरूपितत्वेपि न तत्स्यात्ताहशविषयतात्वेन ताहशप्रकारतानिरूपितत्वमपितु शुद्धविषयतात्वेनेति नास्ति
प्रसंगोनवालक्षणोच्छेद इति आधुनिके नाम्नीति आधुनिकैः पित्रादिभिः कादशे हनि संकेतितेनाम्नि द्वारती
स्वरे छायापाटीता एकादशाहकालीनपित्रुच्चारणविषयनामत्वेन सामान्यरूपेणोत्यर्थः आधुनिकसंकेतितेत्याधु
निकमात्रसंकेतितेनदीवृद्ध्यादिपदेतात्पर्यमपमतेः स्वरसंरद्दितिभापनयो नमतेमत्तशोपतिसन्त्याजितात्र न
शक्तिरितितथ्यसस्याधुनिकसंकेतितान्दद्यादिपदान्चार्थबोधोनस्यादित्यर्थः मतेअपेप्यपभ्रंशात्मकगव्या

एप०

दिपदे शक्तिभ्रमादेवबोधइत्यवधेयं व्याकरणादितिभ्रसत्त्वायां वर्त्तमानेलडित्यादिव्याकरणादित्यर्थः लाघववा
रितिन्वृत्तित्वजातेः शक्यतावच्छेदकत्वेलाघवादित्यर्थः नचकर्त्तरनभिधानादिति अनभिहितइत्यधिकारीयेण
कर्त्तरित्तीयेसनेनानभिहितेकर्त्तरितृतीयाविधानादितिभावः तत्र तृतीयायां तत्रत्वात् प्रयोजकत्वात् तान
उकर्त्तगतसंख्याभिधाने एवं किं प्रयोजकमइत्याह भ्वातम्प्रयोजकं दर्शयति संख्याभिधानेति चैत्रः पचतितरा

८

डुंदत्सादौकर्मत्वादिलाक्षणिकप्रथमांतपदोपस्थाप्यतं डलादिशुद्दासायाह कर्मत्वाघनवत्कृद् इति ननु चै
त्र इव मैत्रो गच्छतीत्सत्राख्यातेनैकवचनत्वरूपे सोक्तौयाः संख्यायाश्चैत्रेऽन्वयः स्यात् कर्मत्वाघनव
त्कृद्त्वात्प्रथमांतपदोपस्थाप्यत्वाच्च किंचापक्कमन्नं भुज्यते इत्यादावन्नादौ संख्यान्वयानुपपत्तिः पाकक
र्मत्वस्यान्नेन्वयेनकर्मत्वाघनवत्कृद्त्वाभावादत आह कर्मत्वादीत्यस्येति तथा च कर्मत्वपदमितरपरं अ
नवत्कृत्त्वं च विशेषणतयाविवक्षितं वस्तुतस्तदपि न विवक्षितं विशेषणत्वमात्रस्य विवक्षितत्वात् अ
विशेषणत्वं [illegible] प्रकारता शून्यत्वं तस्य च यथा हृदबोधात्पूर्वं चैत्रादावपि सत्त्वाच्चैत्र इव मै
त्रो गच्छतीत्यादौ चैत्रे संख्यान्वयापत्तिः न च चैत्रो पंसा हेयमित्यवांतरवाक्यार्थबोधस्य पूर्वं सत्त्वात् क

मु.टी.
७४

समविशेषणत्वं चैत्रेऽपि संख्यान्वयापत्तिः। नन्वेवं [illegible] सेपतिवाच्यं प
त्रखलेकपातत्पायेनबोधनत्रचैत्रौ पचसाद्दृष्टमित्यत्र तत्र वाक्यार्थबोधस्य एवंभावाद्दतो विशेषणत्वं तात्पर्यवि
षयत्वपर्यंताऽथा च नोनचचैत्र एव पचतिचैत्रश्चैत्रे पश्यतीत्यादावेवकारार्थान्यप्रसिक्तमंत्राद्दो तु चैत्रस्यवि
शेषणत्वात्तत्कथं तत्र संख्यान्वय इति वाच्यं विशेषणत्वमात्रेण तात्पर्यविषयत्वस्यापि वक्षितत्वाच्चैत्रस्य कस्य
ले विशेषणत्वमुख्यविशेष्यत्वाभ्यां तात्पर्यविषयत्वात्तत्र संख्यान्वयोपपत्तेः। यदि च चैत्रइव मैत्र इत्यादौ उप
हा चैत्रादेर्न विशेषणत्वं तात्पर्यविषयत्वं तत्राचैत्रेऽपि संख्यान्वयापत्तिः। न च शाब्दबोधे तात्पर्यज्ञानस्य हेतुत्वाल्लै
वमिति वाच्यं नानार्थातिरिक्तस्थले शाब्दबोधे तात्पर्यज्ञानस्य हेतुत्वे मानाभावादिस्युच्यते तदाऽविशेषणत्वं
मात्रप्रयोजकं प्रथमांततत्तत्समदादुपस्थाप्यत्वमत्र बोध्यं न विशेषणत्वं तात्पर्यं न विशेषणत्वमात्रतात्पर्यं तथा
च तंडुलं पचतीत्यादौ पदार्थविशेषणस्य मुख्यविशेष्यत्वाभ्यां तंडुलबोधे तात्पर्यं तत्र तंडुले संख्यान्वयवारणाय
प्रथमांतेत्यादीतिभावः। रूदमपलक्षणं चैत्रेण [illegible] प्यतस्यादौ धात्वर्थस्यापादौ संख्यान्वयवारणाय प्रथमां
तपदोपस्थाप्यत्वस्यावश्यकत्वात्। द्वितीयपदस्य समकारांतरेण प्रयोजनं वक्तुमसमर्थाय प्रथमदलार्थमाह

विशेष त्वं

रामः

= धात्वर्थातिरिक्तविशेषणत्वमात्रप्रयोजकतत्तत्पदानुपस्थाप्यत्वं प्रथमदलार्थः। अस्त्वैवं सारसमभिव्याहृतचैत्रपदं च न धात्वर्थातिरिक्तविशेषणत्वमात्रप्रयोजकमिति २

यद्धेतिः चैत्रादेर्बोरणीमिति तस्य सारश्येऽपि विशेषणत्वादितिभावः। द्वितीयांतपदोपस्थाप्यत्वादितिः प्रथमांतपदोप
स्थाप्यत्वाभावादित्यर्थः। अत्र कस्मै चैत्र एव पचतीत्यादौ चैत्रे संख्यान्वयोपपादनं संधीभिर्विभावनीयं इदं त
वधेयं संख्यान्वयबोधं प्रतिनस्वातंत्र्येण प्रथमांतपदोपस्थाप्यत्वं हेतुः। आख्यातेन भावनानवगाहिसंख्याबोध
स्य कुत्राप्यजननात्संख्यान्वयबोधत्वव्यापकभावनान्वयबोधत्वावच्छिन्नहेतुभूततादृशप्रथमांतपदोपस्थाप्य
त्वरूपकारणाद्विरहेणैव प्रथमांतपदानुपस्थाप्ये संख्यान्वयापत्त्यसंभवात्तन्न च निरुक्तप्रथमांतपदोपस्थाप्य
त्वस्य जन्यतावच्छेदकं भावनान्वयबोधत्वं संख्यान्वयबोधत्वं वेत्यत्र विनिगमनाविरहः संख्यासविषयीकभा
पि भावनान्वयबोधस्यानुभवसिद्धतया भावनान्वयबोधत्वस्य जन्यतावच्छेदकत्वावश्यकत्वे संख्यान्वयबोध
त्वस्य तथात्वे मानाभावात् लकारसामान्यस्याख्यातार्थे शक्तिरिति मीमांसकमतेऽदूषयति गौरवादिति। जन्यत्वादिघ
टितस्य व्यापारत्वस्य प्रवृत्तिजन्यत्वगुरुत्वादितिभावः। ननु आख्यातस्य तन्मलार्थ [illegible] कत्वं रथो गच्छतीत्यादौ तत्
दभावेऽप्याख्यातप्रयोगात्तत्राह रथइति रथो गच्छतीत्यादौ गमनानुकूलव्यापारस्य न बोधः किंतु
गमनाश्रयत्वस्येति नव्यमतमाश्रित्याह आश्रयत्वे वेति [illegible] लक्षणानिरूढलक्षणा क्वचित्तथैव पाठः। वस्तुतो न

२

मु.टी.

९५

नीत्या हीच्यापारे जनकत्वे वा लक्षणास्वीकारः ज्ञानातीत्यादावाख्यातस्याश्रयत्वलक्षणानियमेन संभवतीत्यत
आहेति आदिना इच्छति पतत इत्यादेः संग्रहः इदमत्र बोध्यं तंडुलं पचति चैत्र इत्यादौ कर्मत्वं द्वितीयार्थः तत्र तंडु
लस्याधेयता धात्वर्थः कर्मत्वस्य पाके पाकस्याख्यातार्थकृतौ तस्याश्चैत्र इति तंडुलकर्मकपाकानुकूलकृतिमांश्चै
त्र इति बोधः चैत्रेण पच्यते तंडुल इत्यत्र कृतिस्तृतीयार्थः तस्यामाधेयतया चैत्रादेरन्वयः तस्याश्च धात्वर्थे पाके त
स्यात्मनेपदार्थफले तस्य चाश्रयतासंबंधेन तंडुले इति चैत्रनिष्ठकृतिजन्यफलाश्रयस्तंडुल इत्यन्वयबोधः कृतौ
तु कर्तृकर्मवाच्ये चैत्रः पक्ता तंडुलः पक्व इत्यभेदान्वयानुरोधान्नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वादित्यमत्रावि
स्तरः तयोर्लक्षणेति उपमानेति रूपणावसर इति शेषः शक्तिग्रह इति भवतीति शेषः कोशेन पुंसादिति तिग्गुणश्रुकाद
यः पुंसि सुगलिंगास्तदृतीति कोशस्याभूयत्र शक्तिग्राहकत्वादिति भावः लाघवादिति नीलादिमत्वापेक्षया
नीलत्वादिज्ञाने लघुत्वयाशक्यतावच्छेदकत्वादिति भावः नीलादिविशिष्टवस्तुलक्षणेति गुणवचनानां मतुपो लुगि
ष्ट इति स्मरणान्मधुरसेन मतुपैव विशिष्टार्थबोधसंभवे लक्षणायत्तापि वदंति तत्र घटानयनं न तु पटवहारे
णानयनादिना अनुमिते घटानयनादिधर्मिककार्यताज्ञाने पदानां कारणत्वं लाघवात् सदृत्वावच्छेदेनैव गृही

एम०

मा२

तं एवं च सा साक्षात्संबंधेन कार्यत्वान्वितविषयकशाब्दत्वावच्छिन्नं प्रतिपदत्वेन कारणतेति कार्यकारणभावः पर्यव
सितः इयमेव कार्यान्विते पदानामानुभाविकी शक्तिः एवं च कार्यत्वान्वितविषयकशाब्दत्वव्यापकीभूतकार्यताविषय
यकशाब्दत्वावच्छिन्नजनककार्यतावाच कालिकादिपदाभावात्कर्यं कोशादितः शक्तिग्रह इति प्राभाकरस्यैतन्म
तं दूषयति नव्यास्तु तन्नतात्सिद्धमर्थेऽपि प्रतिपत्तेः इत्यादिना एतेन स्मारकशक्तिप्रसंगे आनुभाविकशक्तिप्रदर्श
नमनुचितमिति परास्तं कानिरस्तान्यनुभूतले नीलाघट इत्यादितः कार्यताविषयकबोधापत्तिः तत्र तादृशपदानां साम
र्थ्यावधारणादित्वयैवोक्तत्वादिति तत्र आह कार्यता बोधं प्रति चेति सामर्थ्येत्तदभावादिति कार्यताबोधं प्रति
लिङादिपदानां स्वजन्यकार्यतोपस्थितिद्वारा हेतुत्वं घटादिपदानां कार्यत्वानुभवं प्रति हेतुत्वेपि घटादिपदेषु कार्य
त्वस्मारकशक्त्यभावेन संस्कारशक्त्या कार्यतोपस्थापकलिङादिपदाभावात्तत्र भूतले घट इत्यादितः शाब्दबोध
इति भावः लाघवेनेति कार्यत्वान्वितघटशाब्दत्वापेक्षया घटत्वस्य कार्यतावच्छेदकत्वे लाघवेनेत्यर्थः अतएव
वकार्यत्वाविषयकबोधं प्रति पदानां हेतुत्वादेव तत्कारणत्वेन सुखदुःखयोः कारणत्वेनात हेतुतया तादृश
शाब्दबोधहेतुतया व्यभिचारादिति घटादिपदैः कार्यते विषयकस्य बोधो जन्यत इति नियमे व्यभिचारादित्यर्थः

८२

शाब्द

५५

मु.टी. ९६

कार्यत्वाविषयकबोधस्यापि चैत्रपुत्रस्ते जातस्तस्मादिपदैर्जननाविति भावः। अहार्यमिति। तथा च तत्रापि लोडादिजन्य
कार्यत्वोपस्थितेः सत्वेन कार्यताविषयकबोधस्येवोत्पादान्नतादृशनियमे व्यभिचार इति भावः। तदभावाच्चेति। तं प्र
त्येत्यादिकार्यताबोधकपदाध्याहारसंभवाच्चेत्यर्थः। भट्टमतं प्रत्याह पञ्चमतमनुपसंहरतीत्यर्थ इति। लाघवादिति। अ
न्वितत्वे शक्तिकल्पनापेक्षयाबद्धमात्रे तत्कल्पने लाघवादित्यर्थः। पदपदस्य तस्य देहलीदीपकन्यायेनान्वयः। त
त्र हि तादृशस्थिविषयस्य वस्तुरेणाकं गौरैश्वेशक्ते वा पदपदस्य शक्तिरिति संदेहे सति पदपदस्येति वाक्यशेषाद्धीद्वेश
के शक्तिर्निर्णीयते तद्वदत्रान्वयः। ननु स्तुपदे पदस्य वाक्यशेषरादौ द्वेशके शक्तिः कुंभादिपि शक्तिसत्वे बाधकाभावाद
त आह। नानाशक्तीति। कथं तर्हि हर्यादिपदे नानाशक्तिकल्पनेत्यत आह। हर्यादिपदेत्विति। विनिगमकाभावा
दिति। तत्रैकोपस्थापकपत्रतत्त्वात्मकते च वाक्यशेषस्येव विनिगमकत्वादिति भावः। आख्यातस्य यत्नार्थक
त्वमिति। न च विवरणस्य कथं शक्तिग्राहकत्वं। तद्वाचकपदाभावादिति वाच्यं। आख्यातं यत्नत्वविशिष्टे श
क्तं। यत्नत्वविशिष्टशक्तं करोति पचति पठितेत्यर्थं प्रतिपादकत्वादित्यनुमानोपस्थापनस्य शक्तिग्राहकत्वात्। प्र
सिद्धपदस्येति। प्रसिद्धार्थकपदस्येत्यर्थः। तिङ्धर्मी धर्मिणिनानामायोन्वयस्यानुपपन्नतयानेदं शक्तिग्रह

एप०

स्योदाहरणमिति तु न। योपः अदूरस्य पचति छिज्जो त्वंसोर्तिर्निदितरस्मादैतिङ्धर्मधर्मिरीत्या त्वपदृशेनेनताह
शनियमस्यापि हेतुः प्रसंगात्स्वमतनिराकरणपूर्वकं स्वमते जात्यादिविशिष्टे शक्तिरिव स्यायपितुं मीमांसकमतमा
ह। जातावेवेति। जातिविशिष्टशक्तिस्वीकारे जातावपि शक्तिग्रहस्यावश्यकता। नागृहीतविशेषणन्यायात्। तथा च जा
तावेव शक्तिर्लाघवात् उक्तं। विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे इतीति भावः। परस्याकस्याचिद्व्यक्तौ शक्ति
स्वीकारे वेति विकल्प्य दोषमाह व्यभिचारादिति। अगृहीतशक्तिकव्यक्त्यापि शाब्दबोधोदयेन तत्र शक्तिज्ञाना
भावाद्व्यभिचार इति भावः। द्वितीये नमाह। आनंत्यादिति। व्यक्तिभेदेन शक्तिभेदाच्छक्त्यानंत्यस्यादित्यर्थः। असं
भवादिति। जातिभासकसामग्र्या एव व्यक्तिभासकत्वादिति भावः। इदमेव कथमिति चेद्व्यक्तिविशेष्यके जातिप्रका
रकशाब्दबोधे जातिविषयकशक्तिज्ञानत्वेन हेतुत्वात्तन्न तादृशबोधे व्यक्तिशक्तिज्ञानत्वेन हेतुत्वमुपगम्यत
त्वाद्वशक्तेः। किं नाकिपतेरित्याद्युक्तं न यासस्तु ज्ञानेसारिस्य प्रसंगादिति। एक्तिं विनेति त्पदजन्यपदार्थोप
स्थितेः शाब्दबोधं प्रतिहेतुतया व्यक्तिशक्तिं विना तज्जन्यतानिर्वाहादिति भावः। लक्षणांतितावृत्तेव हस्तापदजन्यपदा
र्थोपस्थितेर्निर्वाहादिति भावः। अनुपपत्तिप्रतिसंधानं विनापीति मात्रातयत्पादोगेत्वत्ता तेरानपर्नेर्यानुपपत्त्या च

मु.टी.

९९

गोपदस्य गवादिलक्षणास्वीकारेऽपि गोरक्षीत्यादौ गोत्वजातेरलित्वाद्यन्वयानुपपत्तेर्लक्षणाबीजस्याभावेन लक्षणया स्वी-
कर्तुमशक्यत्वादिति भावः। स्वमते पूर्वोक्तदोषमाशंकावारयति- नचेत्यादिना एकस्यादिति- ईश्वरेच्छारूपायाः शक्तेः एकत्वा-
दित्यर्थः। नचानुगमइति- गोव्यक्तीनामननुगततया विषयतासंबंधेन शक्तिज्ञानकारणतायामवच्छेदकत्वासंभव

पा८

इत्यर्थः। गोत्वादेरेवेति- तथाच गोशाब्दबोधे गोत्वविशिष्टविषयकशक्तिज्ञानत्वेन हेतुत्वान्नोक्तदोष इति भावः। ननु सर्वत्र
पदजन्यपदार्थोपस्थितेर्हेतुत्वे मानाभावः। कथमस्य शाब्दबोधे संसर्गभानं- नचैवं पदानुपस्थितत्वादेरपि भानापत्ति-
रिति वाच्यं- गोविशेष्यकगोत्वप्रकारकशाब्दबोधं प्रति गोत्वे शक्तिज्ञानत्वेन हेतुत्वस्योक्तत्वादेतादृशातिप्रसंग-
विरहादित्यत आह- किंचेति- तदाख्यक्तौ शक्तिरिति- गोः शक्तेति विशिष्टज्ञानं प्रमात्मकमेव- तन्मतेऽन्यथाख्यात्यभावा-
त्प्रमायाश्च वस्तुसाधकत्वादिति भावः। समानप्रकारकत्वेनेति- रेहू शक्तिज्ञानस्य गोत्वप्रकारकत्वाभावेन गामानये-

भा

त्यादौ गोत्वप्रकारकस्मरणशाब्दबोधयोरनुपपत्तिरित्यर्थः। नच गोपदं गोत्वशक्तमित्येतादृशशक्तिग्रहस्यैव शा-
ब्दबोधे हेतुत्वात्तस्याश्च शक्तेर्गोत्वप्रकारकत्वात् तत्प्रकारकशाब्दबोधानुपपत्तिरिति वाच्यं- शक्तिग्रहस्य

एम०

हेतोर्गोत्वादिप्रकारकत्वे शाब्दबोधस्यापि तदंशे गोत्वादिप्रकारकत्वमित्येतादृशसमानप्रकारकत्वस्य परमतेऽपि

द्धेतितत्वात्- अत एवाऽऽपूर्ववादे अपूर्वस्य एवमनुपस्थितत्वात्कथं तत्र शक्तिग्रह इत्याशंका कार्यत्वेनैव घटादिषु शक्तिग्रहा-
द्योग्यतया शाब्दबोधेऽपूर्वभानमित्युक्तं तैरिति- ननु कार्यत्वाद्युपाधिप्रकारके शाब्दबोधस्यैतादृशसमानप्रकारक-
त्वस्य तन्मतेऽपि ज्ञातिप्रकारकशाब्दबोधस्यैतादृशसमानप्रकारकत्वेन तदननुमतमत आह- किंचेति- व्यक्तता-
वच्छेदकं वाच्यमिति- गोत्वधर्मिकशक्यत्वज्ञानस्य परधर्मिकगोत्वादिशक्तिज्ञानस्य वा शाब्दबोधे हेतुत्वे गोत्वावच्छि-
न्नगोत्वविषयतायां नियामकत्वावश्यकः। निर्धर्मितावच्छेदककशक्तिज्ञानस्य गोत्वाद्यंशे निष्प्रकारकशक्तिज्ञानस्य
वा विपरीतज्ञानाविरोधिनः शाब्दबोधाहेतुत्वात् तथाच गोत्वत्वेन शक्यतावच्छेदकत्वावगाहितादृशप्रमाया
विषयसाधकत्वाद्गोत्वत्वे शक्यतावच्छेदकत्वसिद्धिरिति भावः। नन्वेवं गौरवमिति- न च गोत्वत्वावच्छिन्नविषयक
शक्तिज्ञानस्य कारणत्वेऽपि सम्भ्रमेण तु तस्य विषयसाधकत्वमिति वाच्यं- तथा सति प्रतीतेः कारणतावच्छेदकत्वा-
द्यंशेऽपि भ्रमत्वसंभवात् शक्यताकारणतावच्छेदकत्वादीनां कुत्रापि सिद्धिर्न स्यात् प्रमात्वग्रहे गोत्वत्वादीनामवच्छेद-
कत्वं तथापि लाघवतरासमवेतत्वादिघटितगोत्वत्वादेर्धर्मितावच्छेदकतात्मकविषयतायाः शाब्दबोधकारणताव-
च्छेदककोटिप्रवेशाप्रयुक्तगौरवं दुर्वारमेवेति- स्वमतमुपसंहरति- तस्मादिति- व्यक्तावेवेति- जात्याकृतिविशिष्टव्यक्तौ

मु॰टी॰ ९८

२५८

वैव॰ अवयवसंस्थानविशेषरूपायाः आकृतेः शक्यत्वेऽपि तदवच्छेदकत्वं सामानाधिकरण्यसंबंधस्य शक्यताव
च्छेदकतावच्छेदकत्वकल्पने गौरवात्॰ अत्र च पर्यविस्यागेन परस्परस्य बोधाभावाद्विशेषैकैव शक्तिरित दोषनायेव
सत्त्वेनात्याकृतिव्यक्तयः पदार्थ इत्येकवचनमिति संप्रदायः॰ नव्यास्तु॰ संस्थानानुपस्थितावपि गोत्वादिना गवाद्यन्वय
बोधाज्जातिविशिष्टव्यक्तावेव शक्तिः संस्थाने च पर्यायवशक्तिः॰ संनिवेशवैचित्र्याच्च अवयवसंस्थानव्यक्त्योरेकपदार्थ
योरपि परस्परमन्वयबोधः सोऽत्र पदार्थ इत्येकवचनं जातिव्यक्त्योरेकशक्तिलाभायेत्याहुः॰ तच्छ्रहस्यवत्
बुद्धिविषयतावच्छेदकीभूतघटत्वाद्यवच्छिन्नेषु शक्तिः॰ अथ घटत्वादीनां शक्यतावच्छेदकत्वे शक्यतावच्छेदकभेदा
च्छक्तिभेदापत्तिः॰ न चैवं शक्यतावच्छेदकभेदेऽपि शक्यतावच्छेदकतावच्छेदकस्य बुद्धिविषयतावच्छेदकत्वस्यैकत्वान्न
शक्तिभेद इति वाच्यं॰ तस्य शक्यतावच्छेदकतावच्छेदकत्वे शाब्दबोधे तस्य नानापत्तेरिति चेन्न॰ बुद्धिविषयतावच्छेदक
त्वस्योपलक्षणतया शक्यतावच्छेदकतावच्छेदकत्वात्॰ उपलक्षणस्य च शाब्दबोधे भानानंगीकारात्॰ घटत्वादेश्च श
क्यतावच्छेदकत्वं विशेषणत्वेनैव॰ अत एव शाब्दबोधे भानं॰ विशेषणत्वं च तत्पदजन्यबोधविषयत्वेन शक्तिवि
षयत्वं उपलक्षणत्वं च तत्पदजन्यबोधविषयत्वेनेष्टत्वाविषयत्वमिति॰ एवमिदं पदार्थे विधेपि॰ नत्रापीदमेतत्सेऽप्र

५ एक॰ १

यद्बुद्धिविषये यत्पदसंकेतो ह बुद्धिविषये शक्तिः॥ अत एव तेषां विभिन्नार्थकत्वं॰ एवं तत्रापि॰ इदमः प्रत्यक्षगतं समीपतरवर्तिवै
तदो रूपं॰ अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयादित्यपि पठन्ति॰ किंपदस्य जिज्ञासाविषयत्वविशिष्टे शक्तिः॰ सर्वपदस्य
व्यापकत्वे सर्वत्वरूपवत्तद्दत्यादेश्च टत्वव्यापकं रूपवन्तमिति बोधात्॰ त्वंपदस्य तत्कालीनसंबोध्यत्वे चेतनत्वाद्विशिष्ट
तावच्छेदकमेवमहंपदस्य तत्कालीनस्वतंत्रोच्चारयितृत्वे चेतनत्वादिः॥ स्वातंत्र्यं चाज्ञा च वाच्यत्वयामद्वचनात्स राजेसा
हौ मम तत्र राज्ञ वैवं बोधः स्यात्॥ विभक्तयः॥ शक्तं पदं विभक्तेते॰ शक्तं पदमिति॥ क्वचिदिति॰ किंचिदित्यर्थः॥ एवमग्रेऽपि॥ मंडू
लादीत्यत्र च वहुषु पुस्तकेषु मंडूपादीतिपाठः प्रामादिकः॥ प्रतिबंधकत्वादिति॥ न च लोके ज्ञानसंयोगिकार्ये बुद्धौ प्रति
बंधकत्वपक्षेऽपि योगार्थस्य पंकजनिकर्तृत्वस्य बोधो न स्यादिति वाच्यं॰ पद्मत्वावच्छिन्नविशेष्यत्वानिरूपितपंकजप
दयोगजन्यपंकजनिकर्तृत्वावच्छिन्नविषयताशालिबोधं प्रति रूढिज्ञानस्य प्रतिबंधकत्वे न पद्मधर्मिकयोगार्थ
बुद्धेः प्रतिबध्यतावच्छेदकानाक्रांतत्वादिति विरोध्यविषयकज्ञानस्य प्रतिबंधकत्वे जनकज्ञानविघटकत्वेनैवेति
नियमभंगमस्तु संयोगचक्षुरूपाने नमस्त्वयत्नं शिराकारमतमाह॰ वस्तुतस्त्विति॰ संनिधानादिति॰ रूढ्यर्थस्य सन्निहितो
पस्थितिकत्वादित्यर्थः॥ व्यक्तिवचनानां संनिहितविशेषपरत्वनियमादिति भावः॥ व्यक्तिवचनानां किं चित्ये
क्तितात्पर्यकाणां॰ संनिहितविशेषपरत्वसमुपस्थितविशेषपरत्वमित्यर्थः॥ तथा च पद्मतात्पर्यसत्वे न रूढ्य

१ २ ५ २ २

मु.टी.

८८

यैयोगार्थयोः परस्परान्वयबोधजनकसामग्र्यंतरसत्त्वेनचरूढ्यर्थएवयोगार्थान्वयोनकुमुद्वादावितिनिरूढिज्ञानस्य
योगिरूढ्यर्थ उद्बोधप्रतिबंधकत्वमः एवंचरूढ्यर्थयोगार्थयोः परस्परान्वयबोधसामग्र्यास्थलएवनकुमुद्वादेःपंकज
पद्याद्बोधोपत्रतत्रयोः परस्परमन्वयबोधसामग्रीविरहस्तत्रकुमुदादेर्बोधोभवत्येवपरंतुकुमुदत्वेनरूपेणकुमु
दत्वविशिष्टपंकजनिकर्तृत्वेनवास्यप्रसायाः शुद्धपंकजनिकर्तृत्वेनतुश्लोधेविशेषप्रचरूढ्यर्थेस्याद्विनान्प्रति
संधीयतइत्यस्तेतत्तरं कुमुदत्वेनबोधेचनास्यर्थमितिप्रत्यग्रीपल्लक्षणायेतिपंकजनिकर्तृकुमुदत्वेनबोधोलक्षणाये
त्यर्थः रूढ्यर्थयोगार्थयोः परस्परसामग्रीविरहोपलक्षणोमततत्तेनरूढ्यर्थबाधप्रतिसंधानासत्त्वेपियत्रसाम
ग्र्यंतरविरहस्तत्रापिलक्षणयाकुमुदबोधोभवत्येवत्रयवश्शक्तिमात्रेणेतिमात्रपदेनलक्षणानाहरः सचि
तम्भिवोहः पंकजनिकर्तृत्वेनकुमुदशाब्दबोधनिर्वाहइत्यर्थः पद्मत्वेनबोधपद्मत्वेनैवबोधस्त्वहर्योवेतिरू
ढ्यर्थतावच्छेदकपद्मत्वज्ञानेसत्त्वाभावेनरूढ्यर्थानिष्ठावनासंभवादितिभावः लक्षणाद्विविधाजहत्स्वार्था अजहत्स्वार्थाच
तत्राद्यांप्रदर्शयति गंगायामितित्वस्यमाणास्वरसादाह्मतात्पर्यानुपपत्तिर्वेति साच लक्षणाच द्वितीयांप्रदर्श
यति एवंकाकेभ्यदधिरक्ष्यतांपद्यानुकंकाकविडालेसाधारणदध्युपघातकत्वविशिष्टएकसार्थवाहित्वेएक
सार्थवाहित्वविशिष्टे[illegible]चिपदलक्षणाभिधानेचवाक्यलक्षणावादिमताभिप्रायेणामापमतेतुछत्रपदस्येवैक

६

टि
रामः

८

स्त

१ सार्थेलक्षणापत्तपार्थश्चसंबंधे[स्त]याचैकसार्थवंतोगच्छंतीत्यन्वयः एकसार्थवाहित्वंचैकसार्थस्वामित्वएकसा
र्थगंतृत्वं नैरयाकहेसरयायतीयस्यानन्वयापत्तेः नचाजहत्स्वार्थेतेनकिंविरुद्धमितिवाच्यं स्वावाक्यलक्षणावादिमतेनैव
तदभिधानादिति क्वचित् गंगापदस्यतीरतात्पर्यग्रहस्थले क्वचित् घोषपदस्यमत्स्यादौतात्पर्यग्रहस्थलेतेनैवरू
पेणेतिनचगंगापामित्यादौ गंगातीरत्वेनबोधेनजहत्स्वार्थत्वहानिरिति वाच्यं तीरत्वेनलक्षणायामेवजहत्स्वा
र्थत्वस्यसर्वसंमतत्वात् गंगातीरत्वेनभानेत्वजहत्स्वार्थेवलक्षणेति एवंपूर्वोक्तस्यस्थलेपक्षेः प्रवेशपमेवोक्तो
प्रतीत्यादावपिपक्षिधुरत्वमेवस्थत्वादिनाबोधेऽजहत्स्वार्थेवलक्षणेतिध्येयमन्यत्रतएवंतद्धर्मविशिष्टेलक्षणा
ग्रहस्तेनरूपेणोपस्थितिप्राद्दबोधोप्रतिहेतुत्वादेवं एवंचपद्मानुपपत्त्याप्यसापिलक्षतावच्छेदकस्यशाब्दभा
नेसकंरूढ्यातिप्रसंगस्यतद्धर्मविशिष्टस्यादिनेववारणादितिभावः इदमुपलक्षणं गंगापदशक्यप्रवाहसंयोगस्य
तीरत्वेवावादित्स्यपिद्रष्टव्यं लक्षितलक्षणाद्विभावः [illegible]
याश्राधिकमाप्नोकाजहत्स्वार्थोपामंतभीवमाह पत्रतिवितिपरंपरासंबंधरूपेति स्ववाच्यरेफद्वयपद्घटितपदवा
च्यत्वादिरूपान्वचद्वौरेफौपद्वेतिसुत्तस्माद्विरेफपदेनस्ववाच्यरेफद्वयसंबंधिभ्रमरपदलक्ष्यतेभ्रमरपदेनचश
त्तोभ्रमरउपस्थाप्यतइत्येतावनेवसामंजस्येद्विरेफपदस्यभ्रमरपरंपरासंबंधरूपलक्षणायेवंचलक्षितेन

९८

मु.टी.
१००

लक्षणं ज्ञापकमिति लक्षितलक्षणा शब्दार्थयोर्यप्यस्त्विति वाच्यम् अतथात्वे तद्विरेफमानपेक्षादितः कर्मत्वादौ भ्रमरपदस्याउ
पपत्तेः॥ प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वादिति॥ ननु तच्छब्दबोधितत्वच्छक्तपदज्ञानत्वेन हेतुत्वाल्लाक्षणिकार्थ
शाब्दबोधः कथं स्यादित्यत आह॥ किञ्चिदिति॥ पदान्तरं समभिव्याहृतं शक्यं पदं शक्तिलक्षणेति॥ स्मृतसंबंधेन परत
॥ कुमतिः प्रभृतिः स्यादिसर्वलाक्षणिकस्थले शाब्दबोधस्यानुभवसिद्धतया लाक्षणिकस्याप्युपभावकत्वमिति तन
न्याः॥ ननु शक्यसंबंधो न लक्षणा अन्यथासतिवाक्यस्यैकार्थप्रसिद्ध्यात्र लक्षणानस्यादिति मीमांसका हेयमिदमप
देशान्वयापन्नस्यापदलक्षणा पात्र संभवेतद्वाक्यलक्षणा॥ अत एव प्रकीर्त्यते इत्याह॥ यत्र गभीर इति॥ क्वचिदिति॥ चैत्रस
गुरुकुलमित्यादावितरपदेः स्वीकृतत्वादिति॥ पदभेदेन यत्पत्तिभेदात्मकत्वेन तथायुत्पत्त्युपकल्पनादिति भावः॥ न
यं नदीपदमात्रे लक्षणाभिधानमिति वाच्यम् प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वस्य प्रयोज्यत्वात् पदस्य लक्ष
णायां युक्तत्वात् अत्र मीमांसका इत्यपि पनः॥ वाक्यलक्षणायै वोपपत्तेः गभीरपदस्य तीरार्थ्यग्राहकत्वकस्य नम

पक्षे न च वाक्ये शक्त्यभावाच्छक्यसंबंधरूपा लक्षणापि न संभवतीति वाच्यम् स्वबोध्यसंबंधस्यैव लक्षणापदार्थत्वात्॥
गंगायां घोष इत्यादौ गंगापदबोध्यस्य प्रवाहस्य संबंधस्तीरे इति तत्र लक्षणा॥ गभीरायां नद्यामिति वाक्यस्य बोध्यं ग
भीराभिन्ना नदीति तत्संबंधस्तीरे इति वाक्येपि लक्षणा॥ एवं समासात्मकेपि चित्रगुरिति वाक्येपि चित्रगुपदस्याव
यवशक्त्या चित्राभिन्ना गौः स्वबोध्या स्वजन्यबोधविषयत्वस्यैव स्वबोध्यत्वात् तत्संबंधस्य स्वामिनि सत्त्वादित्याहु
स्तन्न स्वबोध्यत्वं हि न स्वजन्यबोधविषयत्वं॥ गंगायां घोष इत्यादौ गंगायामित्यस्यापि लाक्षणिकत्वापत्तेः तस्यैव
न बोधकत्वे वाच्ये न च तावतापि निर्वाहः अपभ्रंशस्यापि लाक्षणिकत्वापत्तेः तस्य स्वावच्छिन्नापाशक्तत्ववोधि
न बोधकतासेवतिवेष्ट्यात् तथा वक्तव्यं वाक्यस्य लक्षकत्वं च वक्तव्यं तत्र स्वबोध्यत्वं परिस्वजन्यशाब्दबोधविषय
त्वं तदा गंगायां घोष इत्यादौ गंगापदे लक्षणानुपपत्तिः॥ गंगापदेन तत्प्रवाहशाब्दबोधाजननेन प्रवाह
स्य गंगापदबोध्यत्वाभावात् किन्तु शक्त्या स्वजन्यज्ञानविषयत्वं तदा वाच्यं न च शक्तत्वेप्यधिकं समवायेन घट
पदस्मारितगगनस्यापि स्वबोध्यत्वापत्त्या तत्संबंधवद्गोत्वादिपदेन घटादेः शाब्दबोधप्रसंगात् एवं च शक्यसं

मु·टी·

१०१

वंधापेक्षया शक्त्या स्वबोध्यसंबंधस्य गुरुत्वान्नतस्य लक्षणात्वमिति ॥ किंच · गभीरायां नद्यां घोष इति सम्मतस्य गभीर
नदीतीरलक्षकत्वे बोधे तादृशतीराधेयत्वबोधेऽनुपपत्तिः ॥ आधेयताबोधकपदाभावात् । नामार्थयोर्भेदसंबंधेना
न्वयस्याव्युत्पन्नतयाधेयतासंबंधेनापि तीरस्य बोधासंभवात् । गभीरायां नद्यामिति सप्तम्यन्तस्य तीरल
क्षकत्वे सप्तम्यर्थाधेयत्वादौ तादृशतीरादेरन्वयापत्तिः सप्तम्या नीम(?) क्तस्य र्थान्वितस्वार्थबोधकत्वमुत्पन्नेः ॥ ग
भीरायां नदीमिति भागस्य सप्तमी प्रकृतित्वाभावात् । नचगभीरायां नद्यां घोष इति सप्तम्यन्तस्य गभीरनदीतीरवृत्तित्वे
लक्षणास्त्विति शंक्यम् । तादृशवृत्तित्वस्य बोधासंभवान्वयानुपपत्तेः ॥ नामार्थयोर्भेदसंबंधेनान्वयस्याव्युत्पन्नत्वा
त् ॥ सप्तम्यन्तभागस्य तादृशतीरवृत्तौ लक्षणामुपगम्य तस्याभेदेन घोषादावन्वयः इत्यपि न · अभेदेनान्वयबोधे
समानविभक्तिकत्वस्य तंत्रत्वादित्याशंका विस्तरः ॥ एवमन्वयबललक्षणेऽवच्छिन्नवाक्ये लक्षणोत्पत्तेः ॥ गोपदस्येति
प्रत्ययान्वयानुरोधेनोत्तरपदलक्षणामुपगम्य त्वादिति भावः ॥ गोमती गोस्वामिनी स्वीनंक्रियत इति गो
धर्मिकान्वयबोधे गोधर्मिकवृत्तिज्ञानस्य हेतुतया आवश्यकत्वात्तस्य चाचित्रवज्ञोपस्थित्यादावपि व्रजपदार्थ

राम०

स्य गोस्थानरूपस्य कदेशगविविधान्वयप्रसंगादिति । यद्यपि व्रजशब्दस्य भिन्नादावेक देशान्वयोदृश्यते तथापि

ताहात्म्येन तत्पावान्वयोनस्वीक्रियत इति त्वदृश्यमानिपातातिरिक्ते ति · निपातपदमव्ययसर्गापुपलक्षकं · तेनचंद्र इव
त्याह्लादिवार्थस्याहवृष्टेचंद्रस्य प्रतियोगितयाऽन्वयोपपत्तिः ॥ अस्यायांश्च यनिपातातिभिन्ननामार्थयोरपि भेदे
नान्वयबोधस्वीकारात्तयान्वयबोध इति · भेदेनान्वयबोधस्यादिस्ये ॥ साक्षादेवाप्रत्ययार्थमद्वारीकृत्यैवा
भतस्लेवृत्तत्वालाबाधेयतासंसर्गेणापिवृटभेतलयोरन्वयात्साहाभावस्यापियुत्पन्नेोनिवेशादितिभावः ॥
तत्काः ॥ तत्त्वर्थोन्यान्याभावस्यास्मरणोकस्मिन्भिति · तथाचात्रापिप्रत्ययार्थद्वारैवराजपुरुषयोरन्वयान्नोक्तव्युत्प
त्तिविरोध इति भावः ॥ पदेतु राजपुरुषइत्यादितत्पुरुषे न लक्षणा व्युत्पत्ति वैचित्र्येणास्वत्वादिसंसर्गेणोवराजःपुरु
षादावन्वयस्वीकारात् · अस्य षाद्रशेत्तेरा जमातंगात्तस्येवामीतुरंगमाइत्यादेरोतच्छेदेनराजःपरामर्शोनस्या
त्तस्यैकदेशत्वादित्याहुः ॥ ठे हेतुरत्तरेतरदृहताधवस्वदिरावित्यत्रधवत्वेनखदिरत्वेचप्रत्येकंनोदेश्यतावच्छे
दकं · यथाभुदेश्यतावच्छेदकयाप्यसंख्याबोधकत्वस्याकाणक्षित्यादिवाद्याभामारणपत्तिभिया पुष्पत्वेनध
वखदिरसवृत्तिरहस्य चबोधापत्तेः ॥ परंतु स्वदिरपदस्य धवरखदिरसाहित्याश्रयेलक्षणोपगम्यते · एवंचोद्देश्य
तावच्छेदकीभूतताहृशसाहित्यव्याप्यत्वेन धवदृपवत्तिछित्वस्य · नवाखदिरद्वपदहत्तिछित्वस्यापितुधवरद

१

२

स॰ टी॰
१०२

द्विरेफपदस्थितिद्वित्वसमिति न ध्ववदद्वयोः रे वो द्वद्वतिमीमांसकमतं शंकते न च साहित्येति साहित्यं ह्युभयत्र समुच्चयः सहवृत्तित
रूपं साहित्यं लक्षणमुतैकक्रियान्वयित्वमिति विकल्प्याद्यं दूषयति साहित्यं शब्दयोरपीति द्वितीयं शंकते नन्वेकेति
अनत्वभेवाद्वेति वस्तुगत्या एकक्रियान्वयित्वस्य धवखदिरयोः सत्त्वेप्येकक्रियान्वयित्वस्य शाब्दबोधाभावादि
त्यर्थः द्वन्द्वमुपलक्षणं चैत्रमैत्रौ गच्छत इत्यादौ चैत्रादिपदस्य पदसाहित्यविशिष्टलक्षणा न द्वन्द्वसाहित्यस्य वा
सत्त्वमित्याह तथात्वेतस्य बहुच्छेदना भासत्त्वेनेन गमनकर्तृत्वस्यान्वयेऽपि बोधे न लक्षणापरिहेतुलक्षणाते द्वाक संभव
भेधार्या द्वन्द्वस्य कौ विशेष इत्यत आह कोन्विति चार्थे द्वन्द्व इत्यनुशासनेन तत्र चार्थाः चत्वारः समुच्चयान्वाचये
तरेतरयोगसमाहारभेदात् तत्र समुच्चयान्वाचययोः सामर्थ्याभावान्न समासः समाहारेतरेतरयोः सामर्थ्य ५
सत्त्वात्तत्र समासः तत्र चार्थस्य भेदव्याप्यत्वात्तेद्वन्द्व इत्याप्युत्त्याद्या विद्यादिपदेन प्रमाणप्रमेयत्वा
दिसूत्रपरिग्रहः कथमिति चायदिसमाम द्वन्द्वकपदार्थयोर्भेदस्तेव द्वन्द्वलक्षणानीलघटयोर्भेदाभावात्क रामं
थं द्वन्द्वः एवं प्रमाणप्रमेयत्वादिसूत्रे आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखा
पवर्गास्तु प्रमेयमिति सूत्रोपात्तद्वादशविधप्रमेयान्तर्गतमनो बुद्धीन्द्रियाणां प्रमाणत्वेन प्रमाणप्रमेययो

न्द्वापत्तेः त्रिचान्यं तत्र घटपदोपस्थाप्ये पितृत्वबहुत्वयाजान्वयान्न एव घटघटयोः संभवान्न सरूपैकशेषस्तद्वत्वसी

र्भेदाभावात्कथं द्वन्द्व इत्यर्थः लक्षणेति तथा च तयोर्भेदसत्त्वाद्द्वन्द्व इति भावः ननु भेदइत्यसंगतं नीलत्वघटत्वयोर्भेदाभावा
दत आह अभेद इत्यस्येति केचित्तु पदार्थत्वं पदजन्यप्रतीतिविषयत्वं तथा च कश्चित्पदार्थभेदात्कश्चित्पदार्थतावच्छेदकभे
दाद्द्वन्द्वः प्रकृते च नीलत्वघटत्वयोः पदार्थतावच्छेदकभेदाद्द्वन्द्वः अस्तु वा स एव पदार्थतावच्छेदकभेदः द्वन्द्वः न चैवं घटाद् क्यो
त्यादौ द्वन्द्वः स्यात् समस्तेन तद्रूपवाहकस्तरूपैकशेषेण स्याद्द्वन्द्वस्य नौ मानाभावात् सरूपैकशेषविधेर्हरी रामादौ सार्थकत्वा व
त् अस्तु वा सकृदिति व्युत्पत्तिः परंतु सकृदित्यस्य पदार्थैकदेशो हन्तो विशेषणांशस्त्वो बोधविशेषणमेव तदितिन द्वन्द्वस्या
हुः समाहार इति अहिनकुलमित्यादावहिनकुलयोः समाहार इति प्रतीतेरुत्तरपदे भवलक्षणत्वमित्यर्थः एवकारान्तत्वहिनकुलमा
त्रप्रतीतेर्नोत्तरपदे समाहारलक्षणा न दोषान्तिर्भेत्यभिप्रेत्योक्तपदेति पूर्वपदमिति अपपाठः मितिलक्षणं त्वात्रिलिगमकत्वा
दितिभावः कथमिति कथं समाहारबोध इत्यर्थः तत्र हेतुमाह समाहारेति वा दनासंभवादिति अभिघातस्य संयोगाव
च्छिन्नक्रियापाएववादनपदार्थतयापाण्यादनपदार्थतया धातुः पदार्थतावच्छेदकीभूततनातद्वणाभिघातास्यसंयोगस्य स
माहारे संभवेन वादनकमत्वासंभवादित्यर्थः परंपरासंबंधेनेति स्वाश्रयवृत्तित्वरूपेण तद्गुन्वयात् वादनकर्मत्वान्व
यात् एवमिति उत्तरपदे समाहारलक्षणेत्यर्थः नव्यमतमाह परे त्विति द्वन्द्वघटकस्यनत्तसमाहारोपीतिशेषः नन्तु

४२

म.टी.
१०३

यदि समाहारो न बुध्यते तदैकत्वस्यकृत्वान्वयः समाहृियमाणयोरेकत्वाभावादत आह प्रतिकृमिति तेन्नैकवचनं साधुत्वार्थ
मित्यपि वदन्ति। नत्वपाणिपादमित्यादि समुदायस्य समाहारबोधकत्वाभावेक वचनस्य समाहारसंज्ञेत्यत आह। समाहारसंज्ञा चे
ति तत्रैवेति तथा च पाणिपादमित्यादिकेप्यनुवादोऽन्वयत्वेनात्रापि प्रसंगादिति भावः। ननु नादृशसमाहारसंज्ञा पाः किं प्रयोजनमत आह
अन्यच्चेति समाहारातिरिक्तद्वन्द्वस्यार्थः तथा चैकवचनक्लीबलिङ्गत्वादिपदसंस्कारार्थत्वान्नत्साद्गुण्यमिति
भावः पितरौ श्वशुरौ इत्यादावित्येत्रैकस्य पितरादिमातादिविरूपैकशेषस्थले द्वन्द्वार्थलक्षणोति एकस्य चैत्रादेः पि
तृद्वयासंभवेनत्रविरूपैकशेषं विनागत्यभावादिति भावः। विरूपैकशेषत्वेपि तत्र लुप्तमात्रादिशब्दस्मरणेनैव शाब्द
बोधान्न लक्षणेत्यन्ये एवमप्यत्रापीति उमानस्त्वियस्मिन्नेन यत्रैकशेषस्तत्र हृपति रज्ञा प्रकरणोच्चारणेवान यत्याद्दो
षिवौ नमस्कुर्यादित्यादौ भ्रातरौ पुत्रावित्यत्रापि प्रमाणान्तरेण स्त्रीपरत्वज्ञाने भ्रातृपुत्रौ स्वसृदुहितृभ्यामिति विरू
पैकशेषाभ्रातृपदं भ्रातृस्वस्रोः पुत्रपदं च पुत्रदुहित्रोर्लक्षणोत्यर्थः न लक्षणोति बहुत्वान्वयपोप्यानेकोपस्थितेः शक्ति
त एव संभवादिति भावः। न त्वत्तरूपेति स्वीक्रियते इति शेषः वेदानधिकारादिति स्त्रीशूद्रौ नाधीयातामित्यनेन निषे
धादिति भावः। पाननासंभवेदति अध्ययनविधिसिद्धज्ञानासंभवादिति भावः। तन्न संवेति शुनिबोधितयाजनानुप

२

राम०

पन्नैवेत्यर्थः न तत्तनिषादस्यविद्याकल्पने गौरवमत आह लाघवेनेति ननु स्त्रीशूद्रौ नाधीयातामिति स्त्रीतरत्र्याणप्रा
न्तिभिपालाख्वसकिंचित्कंर तत्र शूद्रपरस्मिन्यादे तरशूद्रपरत्वे निषादस्य वेदांत राध्ययनप्रसंगः अध्ययनपरस्यपा
गोपयुक्ताध्ययनेतराध्ययनपरत्वे च शूद्रान्तरस्यापि पागोपयुक्ताध्ययनप्रसंग इति चेन्न विशेषतः प्राप्ताध्ययनेतराध्ययन
परत्वादध्ययनपदस्य तेन निषादस्य यागोपयुक्ताध्ययने [illegible] तराध्ययननिषेधः शूद्रान्तरस्यत्वध्ययनमा
त्रनिषेधः स्वीक्रियत इति अदोषत्वादिति न लक्षणाकल्पनेपि न दोषः शक्यसंबंधरूपत्वाच्चराणायाः क्लृप्तत्वात्
न च यागबोधमति लक्षणाज्ञानस्य हेतुत्वकल्पनमधिकमिति वाच्यं विषादानां स्थपतिरिति स्थपत्यानिषादसंबं
धभिन्नस्यपत्यनुभवस्य लौकिकवाक्यत्वान्न तदनुरोधेन लक्षणाज्ञानहेतुत्वस्य सर्वथैति द्धत्वेन वैदिकस्या
[illegible] कल्पनादिति चेन्न शक्यसंबंधरूपलक्षणाज्ञानस्य शक्तिज्ञानं विना संभवेन शक्तिज्ञानस्येतत्रोभयसिद्धत
याभ्युपगते वैदिकवाक्यजन्यशाब्दबोधान्ते लक्षणाज्ञानव्यक्तिकल्पनागौरवस्यावश्यकत्वादिति। उपकुंभम
र्द्धपिप्पलीत्यादावितिअत्रत्रकुंभस्यसमीपमित्यस्वपदविग्रहः अव्ययीभावस्य नित्यसमासत्वात् पूर्वपदार्थप्रधा
नतयेति कुंभपदलक्षितस्य कुंभसंबंधिनः उपपदार्थे समीपेऽभेदेनान्वयात् कुंभसंबंधभिन्नसमीपस्यैव पदार्थे दि नि

५

मु॰टी॰

१०४

शेष्यकोऽन्वयबोधस्तत्पर्यः॥ केचित्तु पदार्थः सामीप्यं न तु समीपं समीपे तु पदं लक्षणास्वीकारे तु पदरूपलक्षणापेक्षया कुंभप
दस्यैव कुंभसमीपे लक्षणा। उपपदं तात्पर्यग्राहकं कुंभसमीपमिति चान्वयबोधस्त्वाहुः॥ अत्र पचपदं पिपासतीति तत्पुरुषे
शक्तिनिरूपकत्वं पुनरुक्तं एवं तत्पुरुषे तन्निरासान्तथापि एवं तु तत्पदार्थप्रधानत्वं तत्पुरुषादीतन्निरूपकत्वं पूर्वपदल
क्षणापा इह च पूर्वपदार्थप्रधानेऽर्द्धपिप्पल्यादितत्पुरुषे उत्तरपदलक्षणायां तन्निराकरणमिति भेदादपौनरुक्त्यमिति ध्ये
यं। वैयाकरणामते तु खयतीदं स्वं चेति षष्ठ्यां जैवेति। समासवटकीभूतपदस्य शक्तिलक्षणाभ्यामित्यर्थः॥ ॥आसत्ति
र्योग्यताकांक्षेतिमूलादासत्तेः स्वरूपसत्या एव कारणत्वं लभ्यते न तु योग्यताज्ञानादिवदासत्तिज्ञानस्य। ज्ञानपदस्य स
मासवटकत्वेन समासावटकासत्तिपदार्थेनानन्वयात्। स्वरूपसत्याः आसत्तेः कारणत्वं तु न संभवति। गिरिर्भुक्तमित्यादौ
गिरिपदाग्निमत्पदयोरव्यवधानभ्रमेण शाब्दबोधोदये न व्यभिचारादतो मूलस्य आसत्तिपदमासत्तिज्ञानपरतया व्या
चष्टे। आसत्तिज्ञानमिति। आसत्तियोग्यतेति विसर्गशून्यपाठस्तु उपेक्षितः न तु सन्निधानं तु पदस्यासत्तिरुच्यते इति मूलो
क्तस्यासत्तिलक्षणस्य गिरिर्भुक्तमित्यत्राभावादव्याप्तिः। तत्रापि गिरिपदभुक्तपदयोरव्यवधानसत्त्वादतोऽव्याचष्टे प

एम॰

त्यदार्थेति। अपेक्षितान्वितात्पर्यविषयभूतयोरिति। तयोः पदयोरित्यर्थः। तादृशपदयोरव्यवधानमासत्तिस्तदुपस्थितिः

कारणमित्यर्थः। तथा च गिरिपदार्थभुक्तपदार्थयोरन्वयोऽन्वितात्पर्यविषयोऽपि तु गिरिपदार्थाग्निमत्पदार्थयोरेवेति तयोरव्यव
धानाभावान्नातिव्याप्तिरिति भावः। तेनाऽस्मात्ह शप्तान्त्सदृगर्भासत्तिनिर्वचनेन। न तु नीलो घटो द्रव्यं पटः इत्यत्र नीलपदार्थ
पटपदार्थयोर्यत्रान्वयोऽवगतः तात्पर्यविषयो न तु नीलपदार्थघटपदार्थयोः तत्र नीलपदघटपदयोः सन्निधानस्याजन्दर्थ
योरन्वयस्य तात्पर्यविषयत्वाभावादतस्तत्रैव प्रवृत्तिमाह। नीलो घट इत्यादिना तर्हि तत्र कथं नीलो घट इति शाब्दबोध
स्तत्राह। भ्रमात्मक शाब्दबोध इति। तथा च भ्रमात्मकशाब्दबोधमात्रं न तु तत्रासत्तिरिति भावः। न तु तत्र यथासत्तिभ्रमस्तदा
शाब्दबोधोऽपि भ्रमात्मकः स्यान्न चेष्टापत्तिः घटे नीलत्वसत्त्वेन विषयबाधाभावादासत्तिभ्रमात्मकशाब्दप्रमांगीकारे
चासत्तिघटमस्य [illegible] शाब्दभ्रम इति प्राचीनग्रन्थविरोधस्तत्राह। आसत्तिभ्रमेणेति।
न हीति रीति। आसत्तिविभ्रमस्य न शाब्दभ्रमप्रयोजकत्वं किं तु योग्यताभ्रमस्य आसत्तिभ्रमात्मकशाब्दभ्रम इति प्राचीन
ग्रन्थानुनिर्युक्तिकत्वादग्रहेयेति भावः। केचित्तु मते न शाब्दबोधस्तत्र नीलो घट इत्यत्र एवं तात्पर्यगर्भाऽऽ
सत्तिरिति पाठः। तदपरतरस्यादिसूत्रेणापत्त तात्पर्यगर्भा तात्पर्यविषयीभूतान्वयबोधविषयीभूतार्थबोधकप
दाव्यवधानरूपा पूर्वं निरुक्ता आसत्तिरतो न शाब्दबोधस्य पर्यकृतया व्याख्येयः॥ पाठान्तरं कासत्तिकमिति। न दोक्ता

पात्त्रासत्तेः श्लोकेऽभावाद्विशेषदर्शने पदाव्यवधानभ्रमस्यापि तत्राभावाच्छाब्दबोधो न स्यादिति वाच्यम् श्लोकादौ योजना
वाक्यादेव तात्पर्यबोधोपगमात्। न चास्त्वेकस्मिन्नासत्तिर्मौनिश्लोकेन संभवति। तत्र पदाभावेन पदाव्यवधानासंभवात्। उक्तासत्ति
ज्ञानविलम्बेन शाब्दबोधविलम्बाभावाच्च। किंत्वव्यवधानेन वृत्त्या पदजन्यपदार्थोपस्थितिरासत्तिस्तत्राव्यवधानं श्लोकेनाति
देश्यते शाब्दबोधं प्रति पदजन्यपदार्थोपस्थितेः कारणतया व्यवधाने नेदं न संभवात्तस्मादुक्तापदजन्यपदार्थोपस्थिति
रासत्तिरितिप्राहुः ननु अव्यवधानेन पदोपस्थितिः शाब्दबोधे कारणमित्युक्तं अनेकपदघटितवाक्यस्थलेऽव्यवधानेन पदो
पस्थित्यसंभवादित्याशंकते नन्विति। अव्यवधानेनोत्पन्नेरिति। अनेकेष्यव्यवधानसंभवादिति भावः ननु तद्विशेष्यकतत्प्र
कारकस्मृतिं प्रति तद्विशेष्यकतत्प्रकारकसंस्कारत्वेन जनकत्वात्कथं प्रत्येकपदसंस्कारैर्नानापदविशेष्यकं स्मरणं
भिन्नविषयकत्वादत आह नानासन्निकर्षैरिति। संभवादिति। तथा च यथा घटचक्षुःसंयोगस्य पटप्रत्यक्षं प्रति कारणत्वा
भावेऽपि घटचक्षुःसंयोगपटचक्षुःसंयोगाभ्यामेकं प्रत्यक्षं तथा तत्तत्पदगोचरसंस्कारस्य भिन्नविषयकत्वाद्येऽजनकत्वे
ऽपि तत्तत्संस्कारजन्यस्मरणमेकमेव जायते बाधकाभावादिति भावः अन्यथा नानासंस्कारणामेकस्मरणजनकत्वाभा
वे नानावर्णैरिति। नानावर्णानां प्रत्येकसंस्कारैरित्यर्थः एकस्मरणं नानावर्णगोचरमेकं स्मरणं पदस्मरणवद्धाभ्युत

रविनाशिनीनां क्रमिकाणां पदजन्यपदार्थोपस्थितीनामपि मिलनासंभवात्सर्वत्र शाब्दबोधे पदजन्यपदार्थोपस्थितिः सम
हालम्बनात्मिकैव कारणम् एवं च सर्वत्र पूर्वपदस्य सकलपदार्थानां विशेष्यविशेषणभावमिति न्यायेनैव शाब्दबोधानन्तु विशिष्टस्य
वैशिष्ट्यमिति रीत्या तज्ज्ञानकर्तृविशेषणतावच्छेदकप्रकारकनिर्णयस्य पूर्वमभावादिति प्राचांमतं प्रदर्शयति परे त्वित्यादिना। ए
कदैवेति नतु वर्तमानपेत्यादौ प्रथमं घटीयाकर्मत्वे सैव बोधस्तदनन्तरं च घटकर्मकानयनीत्यादिबोधः इति क्रमेणेत्यर्थः श
ब्दा एवानन्तरत्ससत्तहाहेत्यादिः अत्रहेतु[illegible]विशिष्टाभिः कपोत्तेरस्थिरतरचिरसन्निहितकालोक्तानां पदार्थानां साम्यबोधं के
चिद्दित्यनेन समुचितमस्त्वेरसंभकाशयन्मतान्तरमाहुः परे त्विति। यद्यदिति स्वार्थेकोद्दितस्वार्थयोग्यपदसन्निधानं प्रपद्यते
स्वार्थोपस्थितिविषयो भवतीति न तेनैवान्वितः स्वार्थः पदैः प्रथममनुभाव्यतेऽनन्तरञ्च महावाक्यार्थबोधस्तत्पर्यः। एवञ्चा
वीतं समूहालम्बनात्मकं पदार्थस्मरणं विनापि निर्वाहे इति भावः। न च घटमानयेत्यादौ चरमपदार्थस्मृतिकाले घटा
दिपदार्थस्मृतेर्नाशात्समूहालम्बनस्मृतिरावश्यकीति वाच्यं तत्र घटस्मरणानन्तरमपि घटीयाकर्मत्वेत्याकारकान्वितशा
ब्दबोधस्यैव पदजन्यपदार्थोपस्थितित्वेन तेनैव घटकर्मकानयनेत्यादिमहावाक्यार्थबोधनिर्वाहात् तद्धि पदजन्यपदा
र्थस्मृतित्वेन शाब्दबोधहेतुत्वमपि तु शाब्दबोधसाधारणतादृशोपस्थितित्वेनैवेति। एवं चैतन्मते रेखण्डवाक्यार्थबोध

२५

मु.टी.

१०६

तत्त्वादि २

एवंकएवमहावाक्यार्थबोधः। अत एव सर्वत्र खंडवाक्यार्थबोधरूपस्य विशेषणतावच्छेदकप्रकारकविशेषणनिष्ठ्रपस्य पूर्वं सत्त्वाद्वि
शिष्टस्य वैशिष्ट्यमितिरीत्यैव महावाक्यार्थ उपपद्यत इति यत्र खंडवाक्यार्थबोधनाशोत्तरं महावाक्यार्थबोधः। ~~[illegible]~~ खंडवा
क्यार्थसमानाकारस्मरणं कल्पयित्वा विशिष्टवैशिष्ट्यनिर्वाह इत्याह- तथैव पदार्थस्मरत्येति। अत्रेदं बोध्यं- यत्र खंडवाक्यार्थबो
धानंतरं चरमपदस्मृतिस्तदुत्तरं तत्पूर्वस्मृतिस्तत्र खंडवाक्यार्थानुभवस्य नाशात् समूहालंबनस्मरणमावश्यकमेव च यत्र न विशि
ष्टवैशिष्ट्यबोधसामग्री तत्र विशेष्ये विशेषणमितिरीत्यैव बोधः यत्र तु सामग्री तत्र विशिष्टस्य वैशिष्ट्यमितिरीत्या। सम्यक्त्व वि
स्मरणस्य बीतरवाक्यार्थबोध एवैकमहावाक्यार्थबोधे वीतरवाक्यार्थस्मरणमिव कारणं न तु समूहालंबनस्मृतिः न हि शा
ब्दबोधे पदजन्यपदार्थोपस्थितिः कारणं लाघवेन पदार्थोपस्थितेरेव हेतुत्वात्। अत एव च द्वारमित्यादौ न पिधेहीति प
दाध्याहारः किन्त्वर्थाध्याहार एवेति प्राभाकरमतेन दूषयति- इत्यनुबोध्यमित्यादिना। पदजन्येति। पदार्थोपस्थितिमात्रस्य हे
तुत्वे प्रत्यक्षादिनोपस्थितस्यापि शाब्दबोधापत्तिरिति भावः। ननु प्रत्यक्षोपस्थितकलापादेः शाब्दबोधाभावमात्रस्य बोधो
वा तत्स्वस्य विषयापत्तिरत आह- किन्त्वेति। न नैव सहेति द्वारं कर्मत्वं पिधानं कृतिरिति वाक्याद्द्वारकर्मकपिधानान्वयबोधा
नुदयाद्द्वारं पिधेहीत्यानुपूर्वीरूपाकांक्षाज्ञानहेतुत्वस्यावश्यवाच्यतया तादृशाकांक्षाज्ञानार्थं पिधेहीति पदाध्याहार

२ एण०

२

आवश्यक इति भावः। ननु द्वारकर्मकपिधानानुकूलकृतिबोधे आनुपूर्वीविशिष्टस्य द्वारपदेनेराम्य रूपस्य पिधेहीत्याका
ङ्क्षास्त्रवैज्ञाने कारणमतो न द्वारं कर्मत्वं पिधानं कृतिरित्यस्माच्छाब्दबोधापत्तिः। तथा च द्वारमित्यत्र पिधेहीति पदस्याना
ध्याहारे न च तादृशानुपूर्व्याः परस्पराव्यभिचारः। अव्यवहितोत्तरत्वस्य कार्यतावच्छेदके निवेशात्। न च यत्र द्वारं पिधा
नं कृतिरिति द्वारं कर्म[illegible]त्वं पिधेहीति वाक्यं तत्रापि द्वारकर्मकपिधानानुकूलकृतेः शाब्दबोधापत्तिरिति वाच्यम्। व्याप
त्तेः। प्रत्यक्षानुमानादिनोपस्थितस्येव निराकांक्षपदेनोपस्थितस्यापि बोधे बाधकाभावादत आह- न प्रयोज्येत्यपीति
स्यहपतीत्यादौ इत्यादिना क्रुध्यति दुह्यतीर्ष्यस्तत्येयतीत्यादिपरिस्यहः। चतुर्थ्यनुपपत्तिरिति- कर्मत्वार्थकचतुर्थ्याः स्पृह
पतियोगस्यानुशासने न बाधनादिति भावः। अत्रेदं चिन्त्यं- अस्य वंशीत्यादौ कस्य दाध्याहारस्तावतापि तत्त्वं न्यायोपस्थि
तित्वेन तशाब्दबोधहेतुत्वं- लाघवेन पदार्थोपस्थितित्वस्यैव जनकतावच्छेदकत्वात्- तथा च द्वारमित्यादौ कथं चिद
पस्थितस्य पिधानादेर्बोधे बाधकाभावाद्यद्याध्याहारपक्ष एवोचित इति। मन्ये पदार्थं तत्र तत्र नैरपेक्ष्येन नतत्पदार्थे तस्य
हाय्यवत्त्वं योग्यतेत्युक्तं- तत्राप्युक्तमनुपपत्तु- न च अस्मिन्स्वाधिकरणत्वाभावात् ज्ञानस्य शाब्दबोधाहेतुत्वाद्भेत्सनः प्र
ययमतत्सदृमेकपदार्थे परे द्वितीयश्चेतत्सदृमपरपदार्थे परमित्यभिप्रायेणव्याचष्टे- एकपदार्थ इति- योग्यताज्ञान

मु.टी.

१०७

स्यशाब्दबोधहेतुत्वेमानमाह॥ तज्ज्ञानाभावाद्वेति। अर्थस्त्वादिति। सर्वत्र शाब्दबोधात्पूर्वमनिश्चितत्वादित्यर्थः। क्वचित्संशयस्येति।
संशयानिश्चयस्याधारणायोग्यताज्ञानत्वेनहेतुत्वादितिभावः। अत एव निश्चयमीपदर्शयति। क्वचिदिति। भ्रमेत्वेन तत्रतिमात्रत्वहिक
निर्णयोत्तरभाविनिशाब्दबोधइत्यर्थः। नयाविति। ननु योग्यतानिश्चयस्यप्रतिबंधकत्वे तदभावस्य हेतुत्वंवाच्यं तदपेक्षया
लाघवेनयोग्यताज्ञानेहेतुत्वस्यैवोचितत्वात्तत्राह। तदभावनिश्चयस्येतिबाधनिश्चयकालेपि लौकिकसन्निकर्षजन्यतद्वि
८ षयबुद्धेरुदयाँह। लौकिकेसन्निकर्षाजन्येति। शंखोनपीत इतिनिश्चयेपिपित्तादिदोषवशात्पीतः शंख इतिप्रत्यक्षोदयाद्दो
षविशेषाजन्येत्युक्तं। शुक्तेनेदं रजतमितिज्ञानोत्तरंदोषजन्यस्येदं रजतमितिभ्रमस्य वारणायविशेषेति। पित्तमण्डूकवसा
ञ्जनादिदोषेत्यर्थः। तज्ज्ञानमात्रे। तद्विशिष्टबुद्धिमात्रे। सिद्धमिति। तथाचायोग्यताज्ञानस्य शाब्दबोधंप्रतिप्रतिबंधकत्व
स्यक्लृप्तत्वान्नैवनिर्वाहे योग्यताज्ञानस्यातिरिक्तप्रतिबंधकत्वेन कल्प्यत इतिभावः। ननुयत्रनायोग्यताज्ञानंनवा
योग्यताज्ञानंतत्रशाब्दबोधापत्तिरत आह। योग्यताज्ञानविलंबेति। तथाचव्याप्तिरितिभावः। आहुरित्यस्वरसस्तु
हूजनुपस्थितयकमनुमित्यादिकंनजातंशाब्दबोधएवजात इतिविशिष्टबुद्ध्यावयोग्यताज्ञानाभावत्वापेक्षयालाघवेन
योग्यताज्ञानत्वेनैवहेतुतासिद्धेः। एवंचयद्विशेषयोरितिव्याप्तिबलाच्छाब्दसामान्येयोग्यताज्ञानत्वेनहेतुतासिद्धेर्बो

राम०

धेति। एवमिच्छायाउत्तेजकत्वानुरोधेनायोग्यताज्ञानप्रतिबंधकत्वस्यविशेषपर्यवसानात्क्लृप्तप्रतिबध्यतावच्छेदकस्यानुमिति
त्वादेः शाब्दबोधसाधारणाभावाच्छाब्दबोधेयोग्यतानिश्चयस्यातिरिक्तप्रतिबंधकताकल्पनेगौरवाल्लाघवेनयोग्यताज्ञा
नस्यहेतुत्वंयुक्तमिति। ननुयोग्यताज्ञानस्यहेतुत्वेऽप्रामाण्यनिश्चयाभावस्तत्र विशेषणंतदपेक्षयाऽप्रामाण्यज्ञानाभावविशिष्ट
योग्यतानिश्चयाभावहेतुत्वेलाघवमितिचेत्। योग्यताज्ञानस्यहेतुत्वेतदभाववतितत्प्रकारकमित्येकविधाप्रामाण्य
भावनिवेशेनलाघवादयोग्यतानिश्चयस्यप्रतिबंधकत्वेतुतदभावाभाववतितदभावप्रकारकंतदभावप्रकारक
मितिद्विविधाप्रामाण्य[illegible]ग्रहाभावनिवेशेनप्रतियोगितासंबंधावच्छिन्नप्रतियोगिताकतदभाववत्सभावेप्रतियोगितासं
बंधेनतत्प्रकारकमित्यप्रामाण्यग्रहाभावनिवेशेनचगौरवाद्बाधनिश्चयस्यवतदभावव्याप्यतदभावावच्छेदकनिश्च
ययोःप्रतिबंधकत्वेनातिगौरवाच्चेतिरुचं योग्यताज्ञानस्यशाब्दबोधजनकत्वेशाब्दसामग्रीकालेयोग्यताज्ञानाभावविशि
ष्टात्ममानस्यवारणायतत्रशाब्दसामग्र्याःप्रतिबंधकत्वंकल्पनीयमितिगौरवंयोग्यताज्ञानस्यशाब्दबोधजनकत्वेतु
तत्रयोग्यताज्ञानाभावरूपविषयाभावादेवनतादृशमानसमितितत्रशाब्दसामग्रीप्रतिबंधकत्वंनकल्प्यतइतिला
घवमित्याघवसेयं। तेनैहेनसहतस्येति। तस्यइत्यविशिष्टत्वं तत्पदस्यार्थः। घटमानयेत्यत्र घटपदं विनाऽम्पदस्यान्वयान

५

२६

मु॰टी॰ १०८

नुभावकत्वाद्घटपदविशिष्टत्वमप्यस्तु आकांक्षा। घटः कर्मत्वमित्यादौ कर्मत्वपदे घटपदवत्त्वं तु नाकांक्षा। कर्मत्वपदे द्वितीयाकर्मते
तिशाब्दबोधाननुभावकत्वस्य घटपदविरहाप्रयुक्तत्वात्। अत्र यानुभावकत्वं ताद्दशपदपरिचायकं न तु आकांक्षास्वरूपांतर्ग
तं पदार्थ। अननुभावकत्वमप्याकांक्षास्वरूपांतर्गतं शाब्दबोधे तस्य स्वरूपसत एवोपयोगस्तेन जनितान्वयबोधकाद्याकांक्षा
उत्तरान्वयबोधापत्तिः। एकपदेऽपरपदवत्त्वांशश्च ज्ञात एवोपयुज्यते तेन। क्रियापदेन तस्य। कारकपदस्य। अत्र चैकपदे
ऽपरपदवत्त्वमपरपदाव्यवहितोत्तरत्वं तत्र चाव्यवधानांशस्यासत्त्वेपि वलाभः। आसत्तेः पदाव्यवधानरूपतायाः एवं स
पर्वशीतिनत्वादुत्तरत्वं च क्रियाकारकपदयोर्नापेक्षितम्। चैत्रः पचति पचति चैत्र इति वाक्यद्वयादप्यन्वयबोधात्। ततः क्रि
याकारकपदयोराकांक्षा नास्त्येव किंतु प्रकृतिप्रत्ययोरेव तत्राप्यव्यवधानांशस्यासत्त्वालाभात्प्रत्यये प्रकृत्युत्तर

५।

त्वरूपाकांक्षांशं कारणमित्या हद्दस्तात्त्वित्यादिनान्वयमेति पुत्रो राज्ञ इत्यादावजनितान्वयबोधदशायां राजप
दस्य पुत्रपदेनेव पुरुषपदेनाप्याकांक्षासत्त्वाद्राज्ञः पुरुष इत्यन्वयबोधस्यादत आह। अपमेतीति। तथाच राजपदपु
रुषपदयोराकांक्षायाः सत्त्वेपि तात्पर्याभावान्न तथान्वयबोध इति भावः। स्यादेवेति। भवत्येवेत्यर्थः। ननु पुरुषेणापु

५०

त्रेणाव राजपदस्य तात्पर्ये तत्तानेपि पुत्रपदराजपदयोरेव पत्रैकवाक्यतानिश्चयात्पुरुषपदराजपदयोरेकवाक्यत्वाभावदति

५१

त्रपस्तु तत्र पुरुषपदेन सह निरुक्ताकांक्षायाः सत्त्वाद्राज्ञः पुरुष इति बोधापत्तिरिति चेन्नत्पस्य हंविर्[illegible]नैरपेक्षसमभिव्याहृतपदस्य
तदितरेतर्यकत्वा समभिव्याहारस्याप्याकांक्षाशरीरे प्रवेशात्समभिव्याहारश्चेदं पदमेतत्पदेन सहान्वयबोधपरमिति पद
तात्पर्यमप्रकृते च तज्ज्ञानाभावान्नदृष्टिताकांक्षाज्ञानाभावइति समभिव्याहारस्यानाकांक्षाशरीरे प्रवेशः। किंतु स्वा
तंत्र्येण तज्ज्ञानं शाब्दबोधे कारणमित्यस्येन व्याख्यातत्वात्पर्यज्ञानस्य राजपदे पुरुषविषयकराजसंसर्गकप्रतीतीच्छ
योच्चरितमित्याकारकज्ञानत्वादिना हेतुत्वादेवातिप्रसंगाभावे समभिव्याहारज्ञानहेतुत्वमानाभावः। निरुक्तता
त्पर्यनिश्चयेप्युक्तसमभिव्याहारस्य परतात्पर्यरूपस्य संशयव्यतिरेकनिश्चयेवाभवत्येव शाब्दबोध इत्याहुरित्यन्य
त्र विस्तरः। शब्दानुबोधं। आकांक्षालक्षणे पदपदं पदज्ञानपरं मौनिश्लोकानुरोधात्तत एव वाध्याहृतपदेनाप्याकांक्षा
नि[illegible]वोहः। अध्याहारश्चाश्रुतपदानामनुसंधानं। अत एव सर्वापेक्षापाठन्यत्वं तस्य। यतः स्वस्थानस्थितस्य
पुनरनुसंधानमावृत्तिः। नेदियः स्थानांतरस्थितस्यानुसंधानमनुषंगः। द्वैविध्यं स्थानांतरस्थितस्यानुसंधानमनुवृ
त्तिरपि च सिंहावलोकितमण्डूकप्लुतिगंगास्रोतोवद्विधेति। निराकांक्षत्वज्ञानस्य प्रतिबंधकत्वेन तत्त्वाकांक्षाज्ञानस्य
हेतुसत्त्वमिति तु न सत्। तथा सति साकांक्षाभावितव्याप्यतदवच्छेदकधर्मज्ञानानां प्रतिबंधकत्वे गौरवादित्यलम्।

वस्तुनिष्ठेनेति। वृद्धमानयतीत्यादौ एकमेवविशेष्यकाधेयतासंसर्गकवृद्धप्रकारकप्रतीतीच्छावक्तुस्तात्पर्यं तादृशेच्छायोग्यत्वमि
दं वाक्यमित्याकारकं श्रोतुस्तात्पर्यज्ञानं शाब्दबोधे कारणमित्यर्थः। तत्र युक्तिमाह। सैन्धवेति। आदिना घटो धावतीत्यादेः परि
ग्रहः। तत्र कदाचिच्छ्वेतगुणविशिष्टस्य कदाचित्तु कुक्कुरादेर्बोधस्य तात्पर्यज्ञाननियम्यत्वात्। क्वचिद्व्यवस्थेति। क्वचिदु
भयोरित्यपि बोध्यं। इति न स्यादिति। इति नियमो न स्यादित्यर्थः। ईदृशपलकृताणां तात्पर्यसंशये व्यतिरेकनिश्चये वा शाब्द
बोधानुदयाच्छाब्दबोधे तात्पर्यज्ञानं कारणं पतसंशपरतिव्याप्त्येत्यपि बोध्यं। प्रकरणेति। आदिना संयोगविप्रयोगसा
हचर्यादीनां परिग्रहः। प्रकरणादीनां कुत्सनियतत्पर्दवर्णितो कत्वेनानन्यथासिद्धिमात्रकल्पने लाघवादिति भावः।
अननुगमादिति। तयोश्च परस्परजन्यशाब्दबोधे परस्परव्यभिचारेण न हेतुसंभव इति भावः। इत्थं चेति। शाब्दबोधत्वाव
च्छिन्नं प्रति तात्पर्यज्ञानस्य हेतुत्वे चेत्यर्थः॥ एवमग्रेपि। प्रलयस्य। कार्यद्रव्यानधिकरणकाधिकरणकालत्ववि
शेषात्मकखण्डप्रलयस्य। आगमेति। नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमो ज्योतिरभून्न चान्यदित्याद्यागमस्य
र्थः। शुकवाक्येपि। संवादिशुकवाक्यजन्यशाब्दबोधेपि। शिक्षयितुरेवेति। ईश्वरेच्छाया विसंवादित्वाभावादिति भावः॥ अ
न्यत्विति। क्वचिदित्यस्य विवरणं नानार्थादाविति। गृहीतनानार्थशक्तिकादावित्यर्थः। तेन गृहीतनानार्थशक्तिकस्य गृही

तनानार्थलक्षणकस्य गृहीतविभिन्नार्थशक्तिलक्षणकस्य च संग्रहः। आदिनैकार्थगृहीतलक्षणकस्य संग्रहः। मीमांसाव्याख्यता
नात्मकस्तर्कः। परिशोधितेति। सहकृतेत्यर्थः। तदनुमानं। आहुरित्यस्वरसोद्भावनं तद्बीजं तु गृहीतनानार्थशक्तिकपदजन्यानु
भवत्वापेक्षया लाघवेन पदजन्यानुभवत्वस्यैव तात्पर्यज्ञानजन्यतावच्छेदकत्वमुचितमित्यन्यत्राधिकमनुसंधेयम्॥ स्वगमत
पेति। स्वगमस्य स्वयमप्यूहयितुं शक्यतया दुरूहत्वेवादौ सुधियां जिज्ञासोदयादिति भावः। तथा चावसरसंगत्यानुभवान
न्तरं स्मरणनिरूपणमिति भावः। तत्र स्मरणे न स्यादिति। अनुभवस्य नष्टत्वादिति भावः। नन्वनुभवस्य व्यापारद्वारा का
रणत्वं तच्च कार्याव्यवहितपूर्वक्षणावच्छिन्नस्वव्यापारान्यतरकत्वं तच्चानुभवनाशेपि तज्जन्यसंस्कारस्य सत्त्वान्निरवाध
मत आह। समानप्रकारकेति। विनष्टत्वादिति। तथा च तादृशमपि कारणत्वमनुभवे न संभवतीति भावः। तेनैव। संस्कारना
शकेन समानप्रकारकस्मरणेनैव संस्कारणनरद्वारेणेति। स्मरणस्य तृतीयक्षणे नाशेन स्वरूपतो हेतुत्वासंभवादिति
भावः। कालस्य रोगस्य वेति। अत्र स्यघोत्क्रसमूहालम्बनसंस्कारस्यानाशप्रसंगादिति भावः। न च व्यापत्तिः। जन्यभावत्वेन वि
नाशित्वनियमात्। ननु कालादे [illegible] कालत्वादिना नाशकत्वे संस्कारमात्रस्य क्षणिकत्वापत्तिस्तत्र द्धक्तिवेन
तथात्वे गौरवमत आह। चरमफलस्य वेति। चरमफलत्वेनाप्यसंकल्प्यपितत्वा तेन रूपेण नाशकत्वं वाच्यमिति भावः। नक्र
मेणत्यप्रत्येकविषयकक्रमिकस्मरणरूपस्य संस्कारनाशकत्वाभावादिति। समानप्रकारकत्वाभावादिति भावः॥ ३

मिकेति॰ नस्मरणोत्तरस्मरणोत्पर्थः॥ दार्ढ्यपदार्थत्वादिति॰ तथा च अनः॥ अनः स्मरणान्तरं उत्तरसंस्कारोत्पत्तिः किंतु विद्यमानसंस्का
रस्यैव पुनः पुनः स्मरणेन भूयस्त्वबोधकसमवधानं जायते॥ उद्बुद्धाद्बुद्ध तस्मात्स्मरणान्तरमिति भावः॥ व्यभिचारसंशयइति॰ अ
नुभवत्वेन हेतुत्वे व्यभिचारसंशय इत्यर्थः॥ तथा च न विशेषधर्मेण व्यभिचारज्ञानमिति भावः॥ व्यभिचारसंशयाभावादि
ति॰ सकृदनुभूतस्थले संस्कारनाशकचरमस्मृतेस्तत्कालीनाभावेन संस्कारनाशाभावादनुभवत्वेन हेतुत्वेपि न व्यभिचा
रसंदेह इति भावः॥ यद्यप्यनंतसंस्कारतन्नाशकल्पनागौरवस्य फलमुखत्वेन न दोषत्वमन्यथा विशिष्टज्ञानकल्पनागौरव
भियाश्व मिति प्रतीति विशिष्टज्ञानत्वेन हेतुताविलयप्रसंगात् तथापि ज्ञानत्वेन हेतुत्वे उपेक्षात्मकत्वे तस्य तिव्यक्तिभेद
स्य कारणतावच्छेदककोटिनिवेशेन गौरवमनुभवत्वेन स्मृतिहेतुत्वे तु तत्तत्स्मृतिव्यक्तिभेदानिवेशेन लाघवमिति लाघु
वज्ञानरूपेनजनकसत्त्वाद्व्यभिचारशंका॥ किंचित्कालीनत्वमतीत्यर्थः॰ इति स्मरणानिरूपणम्॥ जन्यसाक्षात्कारत्वादिति॰ ई
श्वरीयसाक्षात्कारे व्यभिचारवारणाय जन्येति॰ नन्वेति॰ लाघवाच्चगिन्द्रियप्राणस्यैव कारणत्वमस्त्वत आह॰ एवमि
ति॰ अस्तु मनसोपि कारणसंयोगाश्रयतये ति[illegible]भावकार्यस्य सासमवायिकारणकत्वनियमादिति भा
वः॥ तन्मनसः विभुत्वेवेति॰ तद्देशसन्निधानं मनसो विभुत्वेन संभवतीत्यर्थः॥ तथा सतीति॰ दृष्टसामग्रीसत्वेप्यदृष्टवि

एम०

नं २ ३ स्प

लिय२

[OrderDescription]
,CREATED=09.08.19 15:56
,TRANSFERRED=2019/08/09 at 16:19:13
,PAGES=109
,TYPE=STD
,NAME=S0001434
,Book Name=M-801-MUKTAVALI DINKARI MSS
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF

FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF

FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,